CC0. In Public Domain, Digitizagtion by eGangotri

5.5

# भारतजीवनम्

रचयिता
डॉ. चन्द्रमौलिद्विवेदी

सम्पादक
शशिकान्तद्विवेदी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# भारतजीवनम्

रचयिता
**डॉ. चन्द्रमौलि द्विवेदी**
अध्यक्षः
साहित्यविभागः
संस्कृत विद्याधर्म विज्ञान संकायः
काशी हिन्दू विश्वविद्यालयः,
वाराणसी।

●

सम्पादकः
**शशिकान्त द्विवेदी**
शोधच्छात्रः
कला संकायः, संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः,
वाराणसी।

प्रकाशक
**शारदा संस्कृत संस्थानम्**
वाराणसी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक-
**शारदा संस्कृत संस्थान**
सी.२७/५९, जगतगंज,
(सम्पूर्णानन्द संस्कृत विश्वविद्यालयीय पूर्वी द्वार के पास)
वाराणसी - २२१००२
दूरभाष-(०५४२) २०४१६८

© श्रीशशिकान्त द्विवेदी

सन् २०००

मूल्य : ५०/-

रचयिता आवास संकेत -
**डॉ. चन्द्रमौलि द्विवेदी**
$N_2$-297/$B_2$ कीर्तिनगर, करौदी,
सुसुवाही, वाराणसी - २२१००५
दूरभाष (०५४२) ३१६१०९

मुद्रक-
बंजरग आफसेट
लालपुर, वाराणसी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# भारतजीवनम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# भारतजीवनम्

प्रस्तुत 'भारतजीवनम्' काव्य में गंगास्तवः,गौरी स्तवः,ऋतुचर्या तथा स्वतन्त्रतासपर्या नामक चार शीर्षक है। स्वतन्त्रतासपर्या के दो पुष्प इसमें प्रकाशित हो रहे हैं इसका प्रारूप विस्तृत हो सकता है ऐसी कवि की भावना प्रतीत होती है। 'निवेदनम्' के प्रथम पद्य से कवि की भावना या काव्य का प्रयोजन अभिव्यक्त होता हुआ सा प्रतीत हो रहा है। जीवन,भुवन तथा वन तीनों पर्याय है जैसा कि 'जीवनं भुवनं वनम्'।

जीवनेश गंगा, भुवनेश गौरी तथा वनेश (राष्ट्रान्त देशेश) सेनानी (सेनापति) हैं। जैसे–हिमालयनन्दिनी गंगा तथा गौरी से प्रसेवित एवं प्रसूत विघ्ननिवारक गणेश तथा शक्तिसम्पन्न कार्तिकेय सबकी रक्षा कर रहे हैं वैसे ही हिमालय प्रत्यन्त भूमि से संयुक्त या प्रसूत हमारे सेनापति भारत की रक्षा करते हैं। हाँ,यह भारतवासियों का कार्य है कि इनकें (गंगा, गौरी तथा सेनानी के) प्रति अपनी समदृष्टि रखें तथा इनका परिवेष विशुद्ध रखें। यदि लोग, इन्हें अपने खोटे आचरणों से दूषित करते रहेंगे तो वे स्वयं ही अपने जीवन के लिए घातक या प्रदूषक होगें। ऐसी स्थिति में उन्हें किसी भी प्रकार के ऐहिक या पारलौकिक सुख शान्ति की कामना नहीं करनी चाहिए। किन्तु यदि पूर्वजों एवं शास्त्रों के अनुसार इनके साथ समुचित आचरण करते रहेंगे तो स्वयं इनसे वे सुरक्षित रहेंगे।

आज देखा जाता है कि गंगाजी में अनुरूप आचरण या श्रद्धा न होने से भारतवासियों का जीवन खतरे में पड़ रहा है, शौर्य प्रतिमूर्ति गौरी जो नारी का प्रतिनिधित्व करती हैं उनके प्रति मानवों की श्रद्धा की न्यूनता से अशान्ति तथा शौर्यहीनता दीख पड़ रही है। हमारे सम्पूर्ण देश के रक्षक सेनापतियों की समुचित सेवा (शस्त्रास्त्रादि व्यवस्था) यदि न कर पायें तो भारत जीवन खतरे में ही होगा। अतः कवि का अभिप्राय स्पष्ट है कि गंगा गौरी तथा सेनानियों में समान रूप से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



समुचित श्रद्धा ही भारत का जीवन है। सभी अन्य शरीरोपयोगी साधनों की उपेक्षा कर जीव प्राणभूत साक्षात् जीवन रूप इन तीनों में श्रद्धा, स्तुति तथा कायिक सेवा रखें तो भारत सर्वतोभावेन सुरक्षित रहेगा। जैसा कि–

जीवनभुवनवनेशा गंगागौरीगणेशसेनान्यः।
रक्षन्तां शिवदृष्टा भारतवर्षं विशुद्धपरिवेषाः।।

(निवेदनम् प्रथमपद्य)

शशिकान्त द्विवेदी
शोधछात्र,
कला संकाय, संस्कृत विभाग
काशी हिन्दू विश्वविद्यालय,
वाराणसी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# शुभाशंसनम्

गङ्गागौरीस्तवनविभवावाप्तदिव्यप्रसादो
ग्रीष्मं शीतं सहृदयमनस्तर्पयन् साधु कुर्वन्।
राष्ट्रस्यार्चां सुरभितसुमैरर्पयन् काव्यगुम्फैः
कीर्तिं प्राप्नोत्यनुपमविभां चन्द्रमौलिद्विवेदी।।

शब्दार्थानाममितमहसां प्रातिभैः सम्प्रयोगै-
रस्मिन् काव्ये भरतवसुधोपास्यतत्त्वोच्चयानाम्।
आद्योपान्तं बुधजनमनोमोहनाभ्यर्चनं यत्
तन्माङ्गल्यं वितरतुतमां काव्यकृच्चन्द्रमौलौ।।

**कैलासपतित्रिपाठी**
संकायप्रमुखचरोऽध्यक्षचरश्च,
साहित्य एवं संस्कृति संकायः,
साहित्यविभागः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः,
वाराणसी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



गंगामघौघशमनीं कमनीयमूर्तिं
गौरीं गिरीशतनयामखिलार्थपूर्तिम्।
कोऽन्योऽप्रमेयगुणमण्डितशूलिमौलिं
स्तोतुं क्षमो भुवि विना कविचन्द्रमौलिम्।।१।।

गंगा शिरस्युरसि यो गिरिराजकन्यां
वाणीमनन्यसुलभां वदने वदान्याम्।
धत्तेऽत उद्गिरति सूक्तिरसालवल्लीं
चञ्चच्चमत्कृतिमयीमिह चन्द्रमौलिः।।२।।

व्युत्पन्नमानसमनोज्ञमरालिकेयं
श्रीचन्द्रमौलिरचिता शतकत्रयीयम्।
गूढार्थिका स्फुटपदा सुमनोभिरम्या
मोदं तनोतु सुधियां कुधियामगम्या।।३।।

शुभ्रा स्वभावतः कम्रा गङ्गा गौरी स्वतन्त्रता,
मधुधारां स्तवन्त्यन्तर्नाममात्रात् सचेतसाम्।
सनाद्यन्तप्रयोगेण गाँभीरं काव्यगुम्फनम्,
कठोरबन्धमप्याम्रं स्वदत्ते स्वादुलोलुपाः।।४।।

वायुनन्दनपाण्डेयः
भूतपूर्व उपाचार्यः - साहित्यविभागः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः,
वाराणसी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# निवेदनम्

जीवनभुवनवनेशा गङ्गा-गौरी-गणेशसेनान्यः ।
रक्षन्तां शिवदृष्टा भारतवर्षं विशुद्धपरिवेषाः ।।१।।

कवयः संस्कृतासिद्धा गुरुकुलसिद्धा बुधा गरीयांसः ।
गुरवः कृपयाविष्टा मोमुद्यासुर्मदीयपदबन्धैः ।।२।।

सर्वान् जीवनदातॄन् नन्तुं स्तोतुं समुद्यता वाणी ।
शिथिलाप्याप्याययतां काँस्कान् नोशेमुषीभाजः ।।३।।

काशीवासिशिवेभ्यो विद्यागुरुचरणेभ्यो यदावापि।
तस्यात्रानवकाशात् कवितायां चापलं न्यासि।।४।।

अनवाप्यार्वाचीनां पदशय्यामपि क्षमावर्षैः ।
व्याकरणेऽप्याश्रान्ति र्दग्धोऽयं स्निह्यतां तूर्णम्।।५।।

विदुषामाश्रवः
चन्द्रमौलिद्विवेदी
साहित्य-विभागः
काशीहिन्दूविश्वविद्यालयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

# गङ्गास्तवः

॥१॥

गङ्गा या ज्ञानमाद्यं तनयति विमलं सम्भ्रमानाप्ततत्त्वा-
-लोकानां राजसानां प्रबलतमतमोगाढक्षिप्तान्तराणाम् ।
स्वर्गं वा ध्यानमात्राद् गमयति निखिलान् सार्थनामे' 'ति पायाद्
घोरेऽस्मिन् कालकालेऽनृतमतिबहुले छद्मचातुर्यभाजाम् ॥

॥२॥

प्रत्यक्षानन्दमन्तः - सुखमतिविभवं केवलोद्रिक्तसत्वं,
श्रौतानुध्वान - हृद्यक्वणनकलकलोद्रिक्तरिङ्गत्तरङ्गम् ।
गाङ्गं देवैरुपेक्षापृथुतनुदुरितध्वंसदत्तेक्षणाङ्गं,
सेवन्तां भारतीयाः ! परिहरत शठानर्थकोक्तेर्विकल्पान् ॥

॥३॥

मेरोर्देवाश्रयाद् या कनकमयतनोः कन्यका स्वर्णकान्तिः,
सर्वेषां पर्वतानां पतिरमितयशाः सोपयेमे विधानात् ।
पूतोच्चैर्वंशभाजोरविचलमहितान्योन्यप्रेम्णोस्तयोर्या
सूतिः सान्द्रानुकम्पा नगपतितनया स्वर्णदी सावताद् वः ॥

॥४॥

वातश्लेष्मापहारा नगपतिजनकाः सन्ति नद्यः कियत्यः,
वेणा कोनं सरस्वत्यमलशुभजला सूर्यपुत्री सची वा ।
प्राचीमौदीच्यदिग्भ्यो वहनगतिसमा, दीयतामम्ब सार्द्धं
सादृश्यं वक्रवाग्भिः कथय कतमया तेऽघविध्वंसनाय ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥५॥

भूभृद्भ्यो निर्गताभिस्त्रिभुवनमहिताभिः सरिद्भिः, समां त्वां,
स्वर्भेदोदग्रधारां त्रिभुवनपवितां कल्पितुं के क्षमाः स्युः ।
स्नानात्पानादपां तास्तनुगतविपदां वारणे स्युः समर्थाः
सर्वाचिन्त्यापदः क्वस्मरणपथगता हंसि गङ्गे विदूरात् ।

॥६॥

एकाङ्गुष्ठोद्गता त्वं ध्रुवभुवनमगा मेरुगं ब्राह्ममस्मात् ,
तस्मात्सीता-सुभद्राऽलकमुपगतन'न्देति वङ्क्षुश्चतुर्धा ।
प्राच्योदीच्योरवाच्यामपरदिशि गतास्ताः क्रमेणाखिलां गां,
त्रैलोकीं प्लावयन्त्यो लवणजलनिधिं प्राविशन् गीतगाथाः ।।

॥७॥

काऽऽप्नोत्पादाम्बुजाग्रोद्दलगतरजसः श्रीहरेः स्पर्शभाग्यं,
प्रादुर्भावैककालं समधिगतगुणाविष्कृताग्राग्रधारम् ।
दुश्चिन्त्याङ्गाघघाते निशिततमदधद्धारयाऽकम्पितान्त-
श्चेतास्त्वं लोकप्रीत्यै त्रिभुवनमयसे प्राप्यसे भाग्यशीलैः ।।

॥८॥

मातस्ते बालुकानां कणवहपवनो दूरदेशङ्गतानां
दौर्भाग्यादूषराञ्चञ्जनिगतवयसा मानवानां कदङ्गे ।
प्रास्पर्शच्चेत्तदानीं धुतदुरितगणाः सान्तरोद्यत्प्रकाशा
आकाशायातयानस्थितनववपुषो विस्मयन्ते महिम्ना ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥९॥

मोहान्धाग्रस्तचेतःकलितमदवशान्मेदिनीं स्कुन्दमाना,
व्यर्थोच्छूनाङ्गदर्पाभिनयवियमनान्मन्यमानास्तृणाय ।
आतिष्ठत्स्वेदयन्तः क्वचिदपथगता भक्षयन्तोऽप्यमेध्यान्
ग्रासानीहामृगास्ते सलिलकणभुजश्चेद् द्युभाजो भवन्ति ॥

॥१०॥

धन्यास्ते पुण्यभाजस्तव सितसलिलान्तर्विगाहाङ्गमोदा-
स्तारङ्गाञ्चत्सुधौघस्फुरणहृतदृशो विस्मृतान्यस्वभावाः ।
अर्धोन्मीलद्दृगन्तानुभवपथगतब्रह्मतत्त्वद्रवापो
जीवन्मुक्ता हसन्ति श्रितयमनियमाष्टाङ्गयोगान् समग्रान् ॥

॥११॥

सर्वस्यां ब्रह्मसृष्टौ त्रिगुणजनकतायां विषादात्मिकायां,
शुद्धं सत्वं रजो वा तम इति भुवने प्रत्ययागोचरं हि ।
किन्त्वम्भोजं विमानं वपुरमलसितं सत्वमेव त्वदीयं
तस्मान्ना नाऽदसीयं तुलयितुमनलं लेशतोऽपीह किञ्चित् ॥

॥१२॥

प्रायश्चित्तातिगेषु स्मृतमपि, सुदिवोधापिताक्षिश्रवो यत्
हस्तोद्यच्छूलचक्राकृतकसुनिगमैरीश्वरैरप्यहार्या; ।
तत् पापानां पटिष्ठं भवति तव दृशा निष्क्रियं, शक्तिहीनो-
-लूकानां दृक्सहस्रं प्रभवति दिवसे तीक्ष्णरश्मौ पुरः किम् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥१३॥

साटोपं चक्रशूलं जहतु हरिहराः, कर्मकाण्डं विधे ! त्वं
सन्ध्याङ्गाघादिमर्षव्रतसृतिनिवहै गण्यतामन्यकार्यम् ।
युष्माकं नास्ति शक्तिर्मयि चितवपुषी' त्येति गर्वं महाघं
तावत्कूलाभिघातध्वनितजलरयो मूलतस्तच्छिनत्ति ॥

॥१४॥

काम ! त्वं याहि दूरं प्रतिदिवसनवोन्मेषितानन्तकाङ्क्ष !
क्रोध ! त्वं कामपूर्तावुपहितमनसा जायमानोग्रबन्ध !।
सश्रद्धं सेविताम्भोमुदितसुरधुनी-पूर्णकामान्तकामा-
-नस्मान् स्थातुं क्षमः किं पतिरपि युवयोर्लोभराजोऽपि वक्ताम्॥

॥१५॥

अत्यर्थान्वेष्यमाणैर्बुधमुनिऋषिभिः साधकैः साधुमार्गै
नैकैर्जन्माप्तदेहैरविचलतपसा तत्त्वमाकारिसाक्षात् ।
तस्याप्तिर्गङ्गयैवं नयनरसनयोः स्पर्शतः, कश्च कस्माद्
भास्वद्धीराग्रहस्तः खनति शिखरिणं हीरकान्वेष्टुकामः॥

॥१६॥

कालः कौपीरपोऽह्ना, नवति दिनमितैः ख्यातसारस्वतीर्वा-
मासान्नां सप्तभिस्ता जरयति यमुनाया रवेरङ्गजायाः ।
गङ्गायाः शुल्वसंस्था विधुतकलुषताया न वर्षं, विविच्या-
-पित्वां धिक् सोद्यमश्चेत् पयसि बहुतरामेध्यवस्तूपहातुम् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥१७॥

दावाग्नेर्लेशमात्रं ज्वलयति विपिनं पादपानां वनान्ते
दीप्तीनामाणवेनासमपृथुतमसां पुञ्जमेकप्रदीपः ।
जीवानां कोटिजन्मप्रभृतिचितवपुस्तन्महापातकानां
सर्वांशं गाङ्गमम्भस्तदवतु नियतं जीवनं भारत ! स्वम्॥

॥१८॥

केचिद्गाङ्गं स्तुवन्ति स्तुतिभिरपवदन्त्येकतोऽन्ये दुराशा-
-स्ताटस्थ्यं केचिदेके दधति निशिदिनं चिन्तयन्त्यात्मनैके ।
स्नातुं सोत्साहगच्छत्प्रतिपदनियताश्वीययज्ञार्थभाजः,
कूलाम्भोऽस्तास्थिलेशेष्वमलगतिरमीष्वेकलाम्बाऽस्ति गङ्गा ॥

॥१९॥

ब्राह्मं कल्पं कपर्दे गणयति नियतं संस्थिता शर्वशम्भोः
कल्पान्तैकागताभिर्हृतविधिशिरसो मुण्डमालामणीभिः ।
जीयादीशस्य नृत्ते विधुतफणिगणोत्क्षिप्तजूटोद्गताम्भः-
-सिक्तांशान्तःकरोटिं विधिममृतपदं प्रापयन्तीह गङ्गा ॥

॥२०॥

तुङ्गात्तुङ्गं सरन्ती सुरगिरिशिरसः शम्भुजूटानुबन्धं
लीला केयं त्वदीया जननि ! भवभयं हारितुं बद्धटोपा ।
नाम्नैवेदं निदग्धं श्रुतिरिति गणये, सत्त्वलोभानुवृत्तिः
शम्भुस्त्वां प्रार्थ्य प्रापत् तदिह मम मतिःकोऽस्ति त्वां प्रत्यलुब्धः ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥२१॥

अज्ञानोप्तान्धकारा दुरितमतिजने भीतिरोगामनस्यं
क्षेप्तारो, व्याकुलाङ्गा रणदनणुजलध्वानभीतेर्दिगन्तम् ।
संविष्टा वाऽथ नष्टा किमु दृगणुनिपतनादाप्तसत्त्वानुभावाः
पापाः कूले तपस्यन्त्यसितकिसलयैश्छन्ननीलाङ्गवृक्षाः ॥

॥२२॥

श्रान्तानामातपेभ्यः शरणमुपगतानां सुखच्छायदानात्
क्षुत्पीडाक्लान्तिभाजां नतविटपफलस्वादसन्तर्पणाच्च।
उड्डीयारादितानां विहगमृगकुलानां निवासोपनायात्
शाखादत्ताल्पवातात् शितितटतरवः साधुचर्यां चरन्ति ॥

॥२३॥

स्थानं दिक्पालकानां नयनपथगमात्, पादुकापूजनाच्च
दत्से देवाधिपानामुदरमितजलावेशनाद् ब्रह्मणोऽह्ना ।
आचूलान्तर्निवेशान्निखिलगुणहरेः, श्रद्धया मन्त्रपूर्वं,
त्रैकालस्नानमात्रात्, परमशिवपदं, शेवधिस्त्वं जनानाम्॥

॥२४॥

दिव्यालोकामितौजःप्रमुदितपितरस्ते कुलीनास्तिलोदै:-
र्गङ्गायां तर्पयन्ति श्रुतिविधिऋचया ईषकृष्णे पितॄन् स्वान् ।
वंशे शान्तिः समृद्धिः सुमतिबलयशोविद्यया सन्ततिर्द्राक्
वर्धन्ते तत्प्रसादऽन्नहि बहुपटुभिर्भिन्नभिन्नैरुपायैः॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥२५॥

दोर्दण्डावर्तशूलैः सरदमितसितोद्धारया भासमानै,
घूर्णद्घोरोर्ध्वतालैरमरगणमनोऽनन्तमोदैः पयोभिः।
सर्वान् घोराघदैत्यान् दितसुकृतसुरान् शैलकन्यां विना का,
जङ्घन्तीशार्द्धकान्तापघननिविडिताश्लेषसौभाग्यवाहाम् ॥

॥२६॥

सौभाग्यादेधमानां पतिशिरसि सुखं स्पन्दमानां लवङ्गीं,
शुभ्राङ्गीं शौर्यशाटोद्भटदितिजगुणान् हारयन्तीं दृशैव।
दर्शं दर्शं भवानी तरलसुरधुनीमीश्वरेणोह्यमानां,
भाग्यानूनेव लीना हरवपुषि जयेदर्धनारीश्वरी सा ॥

॥२७॥

प्राणान् दृक्पातपूतान् दिधरिषति जगन्मन्यमानस्तृणाय,
पादान् कूलोपगन्तुं यियविषति भुवं त्यक्तबाह्यार्थकामः।
आतृप्तं दिव्यतोयं जिगलिषति सुधां न्यस्तदूरेन्द्रियार्थ-
आरुढोद्दामयोगोऽप्यसयति न मनोवासनां त्वङ्गतां हि॥

॥२८॥

धीप्सन् यो ज्ञानदानै रहयति विमलां पार्श्ववाहामपि त्वां
प्राप्तं कृच्छ्रं तितीर्षुश्चहयति कमनां नावमम्यां विमूढः।
सद्यःपातस्तु गर्ते नियतिसुनियतस्तस्य नास्त्यत्र लेशः,
सन्देहस्यात्मवित्त ! क्षणमिह मनसा चिन्त्यतां गाङ्गमम्भः ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥२९॥

छिन्ते मोहान्धकारं ललितसिततनूशोभया, तोयपानाद्
भिन्तेऽन्तर्वासनाञ्च श्रुतजलरणनान्मूढतां संविरङ्क्ते ।
विङ्क्ते वस्तूपभेदान् श्रुतिचयनियतान् वाढगूढाधितत्त्वान्,
तोयान्तर्लीनकायो जपति तव वरं नाम मन्त्रोत्तमं, यः ॥

॥३०॥

पूर्वेषां भक्तिभाजामघचयमरुणः, दृक्कटाक्षैकपाता-
-दच्छैत्सीश्चित्तदोलामनियतविषयां मोहजालोपगूराम् ।
व्यस्मार्षीर्न स्वभावं पतिततमसमुद्धारणाय, क्व मातः,
सम्प्राप्तेऽस्मिन्नुपेक्षा तव मयि पतिते शीलयात्मस्वभावम् ॥

॥३१॥

खिन्ते चित्तं श्रमाच्चेत्तदपि न घटते, श्रान्तिरत्रापि का ते,
दृग्लेशाल्लोकरक्षानिधनजनकताकारितायां प्रसिद्धिः ।
शम्भोर्जूटेन रुद्धाऽसुरगणसमरा स्मीत्य-मूभ्यां विलम्बं
वक्तुं त्वं नेशिषेऽलं परमकरुणयायुक् शिवोऽन्यो वराकः ॥

॥३२॥

मात्रेणासन्यमीनाण्डजकुलजननः कच्छपः सर्वलोकान्,
नानाद्रीनब्धिभूमीन् वहति कणमिदापृष्ठकोणे नदीनः ।
तुच्छीभूतान्यभारो मम दुरितचयो नैव क्लिश्नाति यावद्
दुर्वाहः कच्छपं तं दुरयतु निखिलं तं पराम्बा हि तावत् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥३३॥

चेत्प्राप्तो वारमेकं जननि तव तटं दूरदेशात्कदाचि-
-दातृप्तिं पीततोयो विशदमृतसरस्तुल्यत्वद्वारिकायः।
दाध्येति प्राप्तगेहस्तरलितसलिलां स्मारितानन्दकन्दां
सिस्नासुर्वाःपिपासुः पुनरपि यतते निर्भरं पार्श्वमेतुम्॥

॥३४॥

अर्धोन्मीलद्दृगब्जाः सितमकरगतां शुभ्रमूर्तिं त्रिनेत्रां
कर्णोपान्तप्रसाराम्बकजलजमनोहारि-वक्त्राम्बुजां त्वाम्।
ध्यायन्तः शक्रराज्यं तृणमिव गणयन्त्येकत्वन्मात्रभक्ता-
-स्तार्णाच्छादाच्छगेहाः करधृतसुमणि गुंझिकामीहते कः।

॥३५॥

उत्थाय ब्राह्मकाले सुविहितशुचयस्त्यक्तपादोपनाहा
गङ्गा गङ्गेति दिव्यं मधुरकलरवै र्नाम जेगीयमानाः।
प्रासादान्तःप्रतोली-कुहरनिविडितध्वानपूरैर्दिगन्तान्,
गङ्गेत्युच्चारयन्तः स्नपयितुमपरान् स्नान्ति वाराणसीस्थाः॥

॥३६॥

मातुःस्तन्यं पिपासुःशिशुरिव, कनकं निर्जनस्थं लुलुप्सुः,
शुद्धं चैत .तत्त्वं स्फुरदनवरतं योगयुक्तो मुमुक्षुः।
अम्भः सिस्नासुरेते पटवरणतटैः प्रावृतं वीक्ष्य तत्त्वं,
आवारं क्षेप्तुमाद्यं दधति नतिमंतः, कूलनामः प्रशस्तः॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥३७॥

मृत्तोयामृष्टगोधिर्विधिहरिहरताऽभिन्नतत्त्वाप्तमूर्ति-
-माचाराप्तस्तवैस्त्वामुदरमितजलाविष्टकायः स्तुवन् हि।
हस्तानामृष्टदेहोद्भवमलनिकरोऽधाविताऽधोन्त्यवासाः,
शास्त्रोदिद्ष्टैर्विधानैरमितसुकृतिभिः स्नाति धन्यः स कोऽपि॥

॥३८॥

सूर्यस्त्वद्भक्तिरक्तः किरणगणकरैराशु पास्पर्श्यमानो,
नित्यं प्राच्यामुदेति प्रतिदिनमयते नम्यतां सर्वलोकैः।
तेजोभिर्वर्धमानो निखिलशिखरिणां मस्तकन्यस्तपादः,
राराष्टीति प्रपञ्चे तव चरणरतिः किं न दाधेति काम्यम्॥

॥३९॥

पुष्पैरक्तैर्बुभूषु, स्तवविशदतनुं रश्मिसौवर्ण-सूत्रे-
-ष्वाविद्धां, पादपानामरुणकिसलयानां स्त्रजं बिम्बितानाम्।
आकूलाङ्गानुसक्तामगतकररुहालिङ्गनामर्पयित्वा
व्योमाभूद्व्योमकेशेत्यखिलसुरगुरोर्नामदेशैकपात्रम् ॥

॥४०॥

लौहित्यानादिमाया ततविभुविशदायां चितौ बिम्बनेन,
दुःखानन्तात्मकैकं भुवनमसृजतेत्यात्मना सौख्यमूलाम्।
नूत्नां सृष्टिं विधातुं स्फटिकरुचिपयस्यारुणी सूर्यभासा
प्रातस्ते बिम्बितेवानुपहितसलिलां नौम्यनिर्वाच्यरूपाम्॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥४१॥

पाताले कापिलेनासमयजमरणाद् घोरमूर्ति क्रुधा यद्,
दुर्गान्तःसम्प्रविष्टं विधिहरहरिभिर्दुर्निरीक्ष्यं महाघम्।
हन्तुं भक्तार्द्यमानामुपलमयपथाद् वीक्ष्य शैलाद् द्रवन्तीं
रागाञ्चत्कुङ्कुमेनोदयदिनकिरणच्छद्मनाऽर्चन्ति देवाः॥

॥४२॥

बालादित्यः प्रभाते प्रतिभटदनुजैरावृतो रक्षणीयो
मातृस्वस्रीय एषोऽप्यदितिविनयतः, स्नातविप्राञ्जलिस्थैः।
तोयैः सर्वान् निरस्यत्वरुणरविमपामङ्कलीनं ललन्त्या-
-स्तद्रागारागारक्तभासो जयति जननि ! ते वत्सलोच्चैःस्वभावः॥

॥४३॥

मध्याह्नादित्यशुभ्रामरुणरविरुचारक्तवासोवसानां,
वात्सल्यस्फाररिङ्गद्विपुलतरपयोधारभारां नताङ्गीम्।
विद्याभीत्यग्रहस्तां सितमकरशुभाबद्धपद्मासनां तां
धन्या ध्यायन्ति केचित् त्रिनयनवदनां सर्वदां दिव्यगङ्गाम्॥

॥४४॥

नाबद्धोग्रं समाधिं शिशिरऋतुनिशायां न तोयावगाढा,
रूक्षस्पृट्तारवीं नो त्वचमनुनिदधे नो जपस्फाटिकाक्षाम्।
त्यक्तापर्णव्रता नो वशयितुमखिलेशं शिवं कापि भव्या,
क्रीडत्कापर्दधारामुषितहरमना जीयतामद्रिकन्या॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥४५॥

सूर्यः सोमो हुताशः प्रणववर उमागौर्ध्रुवो विप्रसत्ये,
गङ्गा नन्दा सरस्वत्यसितजलधरा सूर्यपुत्री शिवर्षी।
रात्रान्ते शुद्धदेहा अवहितमनसो ये स्मरन्त्येकमेषु
प्राणायुःपूर्णकाले विमलमतिरमून् सेवते मोक्षहेतुः ॥

॥४६॥

साङ्गा वेदास्तपांसि श्रुतविधियजनं तीर्थपुण्यस्थलानि
चत्वारस्ते पुमर्था जपनियमयमा दानधर्मो महेशः।
विद्या शक्तिः सरस्वत्यखिलशुभकरा सूक्ष्मरूपेण गङ्गां
तिष्ठन्त्यस्मात् स्वबन्धून् स्नपय युगपदं स्नाहि प्राप्तासि मोक्षम् ॥

॥४७॥

सर्पास्ताक्ष्यात् पयोदाः पवनगतिहतात् पर्वता वज्रपातात्
घोरान्धस्तामसानि प्रखरदिनकरात् तत्त्वबोधात् प्रमोहाः।
सिंहादारण्यजीवा दहनलवकणात्तूलसंघाः क्षणेन,
नश्यन्त्येवं महाघाः प्रथितबलजलस्पर्शतोऽनन्तवीर्ये !॥

॥४८॥

गङ्गातीर्थागतानां निखिलजनिजुषां धर्मकर्माणि कर्तुं
नान्वेष्टव्यो मुहूर्तो हरिदवनिमुखं दानपात्रादिकानि ।
देवीगङ्गाप्रभावाद् भवति शुभफलो योऽन्यदेशे निषिद्ध-
स्तत्तौ तुल्यौ, विवक्षुस्तवगुणमबुधो दीपतोऽर्कं दिदृक्षुः॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥४९॥

यज्ञानामश्वमेधो हिमगिरिरखिलेष्वेव पृथ्वीधरेषु
सत्यं पूर्णव्रतानामभयवितरणं सर्वदानादिकेषु ।
प्राणायाम-स्तपस्सु प्रणवपरिमितिः सर्वमन्त्रेषु यादृग्,
गङ्गातीर्थं सतीर्थेष्वमितफलददेषूत्तमत्येव तादृग् ।।

॥५०॥

गङ्गास्नायी पुरा चेद् भवति मम कुले, पितृलोके प्रमोदाद्
गाथा गायन्ति नाना पितर इतरथाकामनानाश्रितोहाः ।
देवर्षीन् तर्पयित्वाऽपरिजनसुतकैर्दुःखितान्यैः सहास्मान्
सश्रद्धं तर्पयिष्यत्यमलतिलजलैरित्यमून् संभरन्ति ।।

॥५१॥

पित्रोर्वंशप्रजाताः श्वशुरगुरुजुषः स्वात्मविक्रेतृहन्तृ-
-गोघ्नाग्निक्ष्वेडदा ये पशुखगकरटोद्भिज्जयोनिप्रसूताः ।
गङ्गातोये विधानात् सकृदपि मनुजैस्तर्पिताःश्रद्धया ते
मुक्तिं स्वर्गाप्तिपूर्वामपि दधति सुखं निश्चितं तर्पकाश्च ।।

॥५२॥

षष्टिः साहस्रमेतां प्रबलहरगणा रक्षितुं संनियुक्ता,
-वासःक्षालास्यथूत्काद्युदरमलजलामेध्यवस्तूपपातात् ।
प्राणादप्यर्हणीयां समलयति नरस्तस्य देहात्मबुद्धीः
सौख्यं शान्तिं धनानां सुतनययशसां घ्नन्ति वृद्धिं क्षणात्ते ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥५३॥

वारैकस्नातगङ्गः हययजनफलं स्नातमासः सुराणा
मीशित्वं स्नातवर्षः सततमभिषवी दिव्यवैकुण्ठलोकम् ।
यावज्जीवं सश्रद्धं प्रतिदिनमपरान् प्रेरयन् स्नाञ्च धत्ते
जीवन्मुक्तः समग्रामवनिगतशुभां सम्पदं मुक्तिमन्ते ॥

॥५४॥

आपः क्षीरं कुशाग्रं दधि मधु करवीराणि पुष्पाणि रक्तं
पाटीरं सर्पिरेभिर्विधियुतनिहितैरष्टभि-र्मिश्रितेन ।
गङ्गाकच्छे प्रदत्ते सकृदपि रवये ताम्रपात्रेण चार्घं
नीरोगः सूर्यभासः सकलभवसुखस्यैकपात्रं स भाति ॥

॥५५॥

तुल्यं ते दर्शनेन महिततरुवरारोपणं, स्पर्शनेन
वापीपुष्पादिवाटीरचनममृतगण्डूषपानेन दानम् ।
पादत्राणार्चनेनाधिगत-सुखधनायुष्य-वश्यौरसादि
भक्त्या तोयावगाहैरचलसुरपुरीवासनिर्वाणतत्त्वम् ॥

॥५६॥

वैशाखे कार्तिके वा तपसि जलरये दुर्लभस्नानजन्यं
दर्शे संक्रान्तिग्रस्ते विषुवदयनयोः पर्वचूडामणौ[1] वा ।
स्नातां पुण्यं क्रमादध्धी, दशगुणमधिकं शास्त्रकृद्भिर्निरुक्तं
चेद्गाङ्गस्नानमेषु प्रसरति मनुजस्यास्य भाग्यं ब्रुवै किम् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥५७॥

ज्येष्ठे नक्षत्रहस्ते सितदलदशमीसंयुते जागरित्वा
दिक्पुष्पैर्दिक्प्रदीपैर्दशसुदशमितैर्दिक्फलैर्वा दशाङ्गैः।
धूपैराज्यादिमिश्रैः प्रसृतिदशतिलैः शर्करासक्तुपिण्डै-
-र्दिक्कृत्वः पूजयित्वा द्विदशमितमनुं[२] जञ्जपत्स्वाशुसिद्धिः॥

॥५८॥

हेम्ना, रूप्येण गङ्गाप्रतिकृतिममलां संविधायास्यपद्मं
सञ्छाद्य श्वेतवस्त्रैर्नियतपरिगते पूर्णकुम्भे निधाय।
देवीं पञ्चामृतेन स्नपिततनुमिमां सेवितां वाहिनीभि-
र्लावण्यस्यन्दिगात्रां घटजलजवराभीतिहस्तां समर्चेत्॥

॥५९॥

सौम्यां श्वेतातपत्रोपहिततनुलतां चामरैर्वीज्यमानां
चञ्चच्चन्द्रार्बुदाभामृषिगणविनुतां वेदवाहां त्रिनेत्राम्।
गन्धाढयोच्चैःसुवासां झरदमृतकणस्पन्दवक्त्रेन्दुपूर्णाम्।
लुभ्यल्लोलालकालिभ्रमरकवदनां ध्यायतादीशगङ्गाम्॥

॥६०॥

निर्मायाच्छाक्षताद्यैर्हरिहरविधिशैलेशभागीरथेनान्
मूर्त्यग्रे पूजयित्वा दशसु प्रतिबुधं प्रस्थमेकं तिलानि।
देयान्मत्स्यादिहंस-प्रभृतिजलचरान् हेमरूप्यादिमूर्तीन्,
साध्वापूज्याप्सु क्षिप्याद् रहितधनशठादेष पूजाविधिस्ते॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

//६१//

कायस्यादत्तग्राहस्त्वविहितपरहिंसाऽन्यदारोपसेवा,
वाचां पैशुन्यमिथ्यापरुषवचनतावाक्प्रलापस्तथा च।
चित्तस्यान्यार्थलोभो वितथपरिनिवेशः परानिष्टचिन्ता
स्नातामभ्यर्चतां सा दहति दशहरा पातकानां दशेति।।

//६२//

गङ्गे ! रुद्रे ! शिवे ! हे सरदमृतजले ! गौरि ! गङ्गे ! सुभद्रे !
सर्वाधिव्याधिवैद्येऽचरचरविषहे ! जीवने ! जीवपाले !
तापोन्मूलव्रतार्ये सुकृतसुधनदे भुक्तिमुक्तिप्रदे ! क्व,
संसारोत्तापतप्तं चरणनिपतितं त्रायसे नाम्ब! किं ! माम्।।

//६३//

नन्दे ! मन्दाकिनीशे ! स्फुरतु ममपुरः पार्श्वयोःपृष्ठभागे
आदौ मध्ये तथान्ते त्वमिह हि प्रकृतिर्व्यक्ततत्त्वं पुमाँश्च।
रोगस्थो रोगतो वा विपदिनिपतितो मुच्यतेऽर्वाग् विपद्भ्यो,
बन्धाद्बद्धोऽरिभीतेर्भयलुलितमना, विस्मृता किं प्रतिज्ञा।।

//६४//

लोकानां कामपूर्त्यै भुवनसुविदितान्यान्यतीर्थानि यानि,
सेवन्ते काशिकायामुदगयनपरां त्वां महेशप्रमोदाम्।
आधिष्ठानाविमुक्ते कलिकलुषहरामप्यनासेव्य गङ्गे !
एनःप्रक्षिप्तचित्तो भवभयसरुजो निर्वृतिं प्राप्नुयात् कः।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥६५॥

पित्रोराज्ञावहेलो जनयितृभयदो भ्रूणहा मद्यपायी
प्रत्तक्ष्वेडासुहर्त्ता श्रितविषमरणोऽकालमृत्युङ्गतोऽन्यैः।
आत्मार्थं पाकशीलोऽप्यहनिरतिपरःस्त्रीषु, हिंसोन्मुखीनः,
अस्थ्नाप्याप्तप्रवाहः पतति न निरये, तन्महत्त्वं महत्त्वम्॥

॥६६॥

आलोलापांतरङ्गात्तरलतरदृगावर्तसंवर्तनाद् या
उग्रां कालीं करालां कलकलकलनोत्तुङ्गनादैर्हरन्तीम्।
मुञ्चन्ती पापपुञ्जे रणझणझणया धारया चन्द्रहासं
छिन्दन्ती मोहजालं नरिनरि विजया साविरास्तां सुभद्रा॥

॥६७॥

उद्यन्ती भौमदोषान्मलचितरजसां तीव्रवाहां तरांसि
तर्जन्ती वार्षुकाम्भोधररुचि-रजनीचारजाम्बालकानि।
आघ्नन्ती तानि घोरं दशवदनदशोच्चण्डपापोत्कराणि
सद्यो नन्दाऽविरास्तां नरि नरि विजया भारते भारतीया॥

॥६८॥

ताम्रास्या चण्डरक्षोहननिपतितोच्छोणितारुण्यभासा,
मेघाच्छादाभकालायसपरिघकरोदीच्यप्राचीविवर्ता।
सद्भिरुत्तारदुःखैः स्तुतिपरनुतिभिः स्तूयमानप्रणम्या,
जीयात्काचिन्मदोग्रा नरि नरि विजया सायुधा ऽऽविर्भवन्ती॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥६१॥

आकाशादापतन्तीं तडिदिव नितरां कान्तिमात्रातिसारां,
वीक्ष्यैतन्नारदाद्याः किमिति सचकिता ऊर्ध्वनेत्रा भवेयुः।
किं साक्षात्स्वप्रकाशो जटिलदृढसमाधावगम्योऽपि गम्यः
सान्तर्निदेश्च तावद् द्रवितमिति विदुः कृष्णराधीयतत्त्वम्॥

॥७०॥

तद्भासश्चाकचिक्याद् दृशमिव पिदधुस्तर्कयन्तो निलिम्पाः,
सूर्याणां सारतेजः समुदितभवनं किं निरालम्बमात्रम्।
संदेहैकान्ततान्ताः सुरपुरसुकृतं वाम्बुधे रत्नसार-
इद्धानुष्णोत्प्रभाभि र्जननि बुबुधिरे निश्चितं ते न तत्त्वम्।

॥७१॥

हाहाहूहूः हरीणां स्तवनपरिकरोद्भूतशुभ्रात्मसारं,
आद्यातोद्यादिगीतप्रचुररसपरापिण्डि, गन्धर्वलोकाः।
यक्षाः शम्भोः प्रसादप्रसरमधुरिमस्वच्छमन्दस्मितास्यं
मातुस्ते प्रागभावक्षणसचकितलोकाः के न संदेहमापुः॥

॥७२॥

वात्सल्यादूर्ध्ववाहाशिखरकविसरान् शैलराजः प्रतेने
सूर्यास्याश्वाग्रमार्गं रुरुधयिषुरिवाभ्यस्तनाकावरोधः।
शम्भुस्तेने कपर्दं किमिति लुलुभिषुर्व्योमकेशः समन्ताद्
ब्रह्मा कामण्डलास्यं वशितमतिमनःसर्वकाम्बा विजयताम्॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥७३॥

पापानां तीक्ष्णधारं कुलिशमिव सतां नेत्रमोदा शलाका,
भूपालानां तपस्या मृतिमितपतितानामपारोपकारः।
विद्यामूर्जस्विनीं काममधिजिगमिषतां मूर्तविद्येव नृणां
दुःखान्यैकान्तिकं त्वं शमयितुमजराद्रौषधिर्वीक्षितासि॥

॥७४॥

रुद्रः शर्वो भवेशानपशुपतिमहादेवभीष्मोग्रसंज्ञाः,
सूर्यो भूमिः शुभाम्भः-पवनशिखि-निशेशाभ्र-लब्ध्येष्टदीक्षाः।
पर्याया हि क्रमेण, दधति पशुखगान् नृन् प्रपन्नेतराँश्च,
निर्हेतुप्रीतिरष्टस्वतनुसमुदितः पालयस्यष्टमूर्तिः॥

॥७५॥

आकाशस्था चिदात्मा, हिमगिरिशिखरे शैलपुत्रीति ख्याता
कुण्ड्यां ब्रह्माण्डस्रष्टुर्निगमसहचरा ब्रह्मचारिण्यभीष्टा।
कापर्दस्था द्वितीया शशिसितकिरणा चन्द्रघण्टेति रोषाद्
भ्राम्यन्ती जूटमध्ये रिपुभयहरकूष्माण्डसंज्ञासि गङ्गा॥

॥७६॥

दैत्यैरत्यन्ततान्तः सगणसुरपतिर्वह्निमीशानुकम्पा-
माप्तुं प्रैष्यत् समीपे रहसि निवसतोरीशगौर्योः सुताय।
दम्पत्योरन्तरस्थाविहितफलमदाद् वीर्यमुप्त्वा स वह्नौ
संतापव्याकुलोऽस्मादधित पयसि ते, त्वं ततः स्कन्दमाता॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥७७॥

दुर्वासः सामगानाद् विगलितमितयोः कृष्णराधाख्ययोर्यत्,
तत्त्वं प्राप्तद्रवं तत् त्वमसि सदुभयं को धवः कात्र भार्या ।
शान्तार्धान्तोऽर्धवृद्धा निखिलगुणनिधिर्गानरागं वसाना
कात्यायन्येव तस्माज्जननि परिचिताऽनन्दब्रह्म-द्रवात्मा ॥

॥७८॥

सर्वेषां तन्मनूनां प्रलयमुपगतौ सृष्टिसंहारमूला
ख्याता या कालरात्रिर्बहुलशितिगतामात्मदीपावलीति ।
आद्ये वैशाखशुक्ले गुणतिथिदिवसे ज्येष्ठशुक्ले दशम्यां
दीपानामावलीभिः त्वभवदपचितिः कालरात्रिस्ततोऽसि ॥

॥७९॥

वात्सल्यात्त्वं सुतीयस्यखिलभुवनजं जीवमेकान्तदीनं
विश्वस्मिन्नङ्गनीयस्यमलविधियुते वा हरीयस्यनूपम् ।
सर्वेभ्यः कर्मणस्त्वं वितरसि महतीं सिद्धिमेतेन लोके,
गौरीगङ्गा प्रसिद्धा लषितमुनिजना सिद्धिदात्री त्वमेव ॥

॥८०॥

सर्वज्ञोऽप्यज्ञसंज्ञो धनपतिरधनो देवयाज्यप्ययाजी
उच्चैः प्राप्तप्रतिष्ठो लघुपदनियतः कीर्तिमानप्यकीर्तिः ।
दारापुत्रादिशस्तोऽप्यमतपतिसुतः नैरुजो व्याधिविद्धः,
अस्नातस्त्वज्जले यो निवसति भुवने प्राप्यतीरः कथञ्चित् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥८१॥

मित्र ! श्रान्तोऽसि धावन्नरिगणदलितः पातकैर्वेष्टितान्तः,
दारिद्रयोद्दाहदग्धो गृहसुतकलहम्लानचित्तस्त्वशान्तः।
मा भैषीस्तीव्रधारा त्रिदिवसरिदियं शक्यते चेत्त्वयाप्तुं,
नो चेद् धीरो भवैवं, नियतफलभुजिः कर्मणां ब्रह्मदिष्टा॥

॥८२॥

युग्मं त्वत्पादुकाया, रजतविरचिते पादपीठे, निविष्टं,
शान्तान्तःशुद्धभावः शतगुणफलदत्वज्जलैः स्नापयित्वा।
नित्यं पुष्पादिगन्धैर्यजति यदि जनः पुण्यमायुर्धनानि,
स्वर्गं सर्वं पुमर्थं वरयति किमिहालभ्यमस्त्यर्चकेभ्यः॥

॥८३॥

अङ्गान्यस्थ्ना-जराणि, वहति न रसना स्तावितुं स्तोत्रकाणि,
चक्षू रागाकुलान्धं परनिजविभिदालोभमूढान्तराणि।
पादौ गन्तुं न शक्तौ तव शुभसदनं, पूजनादौ न हस्तौ
मातस्त्राह्यात्मनान्तःप्रकटनविधयाऽशक्तभक्तेष्वनन्यम्॥

॥८४॥

कुम्भीपाकार्हणोऽयं त्वसिनिशितवनं वेशनीयः सभूतिः,
तामिस्त्रे पातदिष्टः, प्रलपनविधयावाप्तदंष्ट्राकरालः।
सूचीभेद्यान्ध्यपूयप्रतरनिरयगायोन्मुखोऽप्युद्धृतोऽम्बे!
किन्त्वैकस्तादृशो नो झटितिपरिकरं संबधानोद्धराय॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥८५॥

शम्भुर्ध्यातो न चिन्तत्यखिलपशुपतिर्गोपवासोऽपहारी,
गर्वान्तर्वासनोऽसौ हरति मथितजं पायसं वा मुरारिः।
अम्भोधौ शेषतल्पे स्वपिति सुखतमं श्री र्हरिर्वीक्षतां कं,
प्रायश्चित्तातिपापं तरयतु तरलान्तर्दये ! मां विपन्नम् ॥

॥८६॥

गर्जर्द्घोरं, गुरूणामकृतपदरजःसेवनानादरोत्थं,
अज्ञानालस्यतो वा कुलगतनिगमाद्यप्यनध्यायजातम्।
निर्दिष्टानेहसि श्रुत्युपगतविधिनासन्ध्ययोर्वाऽनुपासात्,
प्रादुर्भूतं महोग्रं दुरयतु दुरितं यद् यदस्ति प्ररूढम् ॥

॥८७॥

गङ्गोद्गादासमुद्रं सरदगंदजलाया द्युनद्युस्तटानि
तीर्थं, सर्वाणि नृणां नमयति निखिलां कामनामिष्टजुष्टाम्।
तत्रौदीच्यप्रवाहं तदनु च सरितां सङ्गमापःप्रयागः,
काश्यामौदीचगङ्गं, परपरसुकृतैः सेव्यते भाग्यवद्भिः॥

॥८८॥

प्रादुर्भावस्थलं यःसकृदपि पुरुषो गन्तुमीशीत पद्भ्याम्,
भुक्तेर्मुक्तेश्च लाभः करतलपतितो नानृतीतीति तस्य ।
निर्हेतूद्यद्दया या सकलजनसुखा जीवनस्य प्रदात्री,
तस्याःप्रान्ते विशुद्धो निवसतु नियतं शोधयत्वन्त्यभागान्॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥८९॥

शक्रं भूत्यै, धनार्थी हुतवहमखिलारोग्यकामस्तु सूर्यं,
ब्रह्माणं ब्रह्मवर्चःकमन इभमुखं कर्मणां सिद्धये हि।
चन्द्रं भोगोपकामः, पवनमतिबलो ज्ञानमुक्त्यै च शर्वं
भूत्यादेराप्रमुक्त्यै सुरनगतनयां सेवतामेकमात्रम्॥

॥९०॥

लोभो द्वेषी गुणानां, धनसुकृतयशोहारकः कामदोषः,
क्रोधः श्रीधैर्यहारी, मद इह कृतिषून्मादकोऽहङ्कृतिश्च।
दोषारोपः सदेर्ष्या गुणगणनिकरे, लोकसिद्धा नराणा-
मेते नश्यन्ति दोषा-स्तव चरणरतेष्वाप्नुवन्तो जनेषु॥

॥९१॥

दौर्भाग्याद् निःस्वते! त्वं स्पृशसि सुरधुनीस्नास्नुमार्यं मनुष्यं,
दग्धान्तर्निःस्वतात्वा भवसि सुविदिता स्वात्मघातासु तूर्णम्।
तस्माद् रे दुर्भगे! चेत् कतिपयदिवसस्थायिकामासि तूर्णं,
कोटीनां योजनानां प्रतिदिशमभितः पश्य मा स्नातगङ्गम्॥

॥९२॥

स्थाणुर्भूत्यङ्गभूषो मृगपतिगजयोश्चर्मवासाः सशूलः,
सर्पैरालीढकायो विषमविषगिलो वृद्धवर्दोह्यकायः।
हस्ताङ्घ्रिभ्यां विहीनैः परिचरनिवहैस्तुन्दिलैः पारिवारः,
गङ्गासेवैककार्याद् भवपतिरभवद् सर्ववन्द्यो महेशः॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥१३॥

सायं चन्द्रोदये यैस्तरलसितजले बिम्बितश्चन्द्रबिम्बो
लोलल्लीलातिशोभो विहितसुकृतिभिर्नीयते चित्तवृत्तिम्।
भीष्मं क्षत्रावतंसं सुतमखिलमनस्तर्कपारेप्रतिज्ञं
स्नेहादङ्के ललन्ती लसदमलविभोत्प्रेक्ष्यते भाग्यशीलैः॥

॥१४॥

रे रे मत्तेभचित्त ! शृणु मम सुहृदः स्वल्पमानल्परागै-
रध्युष्टस्यातिकालस्तव विषयवशः स्वायुषोऽस्ति व्यतीतः।
अद्यत्वे चेद्दशेयं, सजसि यदि मनो वासनायामपीद्धं
तर्ह्येकां स्वर्णदीमां शरणमवनम क्वान्यतस्तेऽभिरक्षा॥

॥१५॥

मातर्गङ्गे ! प्रतप्तं, मतिगतिविभवैर्नाल्पमप्यागृहीतं,
दीनं, दुर्वासनात्तं, सकलदुरभिसन्धानवादाभिभूतम्।
सान्द्रान्तर्म्लानकायं मलिनममितदुःसह्यदोषैकपात्रं
भ्रान्तं मां नैव कस्मादवसि हरिशिरःक्रीडने ! हीनपीने॥

॥१६॥

यस्या ब्रह्माण्ड भाण्डं गुणगणगणनायां लघुत्वं प्रयाति,
शुष्कं सर्वं समुद्रं वहदमलजलैर्लेशतो या बिभर्ति।
सौभाग्यागूरगौरी विहरति सखितामाप्य साकं ययाऽद्रौ
जूटाबालेन्दुकान्तिर्भवतिसहचरी सा पराम्बाऽस्ति कापि॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥९७॥

सौख्यं वा स्वर्गलोकः, सकलरिपुगणौच्चैःशिरःपाददानं,
कीर्तिश्चन्द्रातपत्रा निखिलवसुमतीशासनैकोच्चकामः।
विद्यासु प्रौढिवाञ्छा धनपतिसकलेष्वाद्यसंख्येयसंज्ञा-
-लिप्सोपायान् हि तान् तान् परिहर, सकलानाप्नुयाः सेवयाऽपाम् ॥

॥९८॥

मेधा कामानुवेधा, मतिरतिसमला ऽल्पज्ञवन्द्यास्ति प्रज्ञा,
नूत्नोन्मेषातिवन्ध्या निखिलकविजनप्रातिभानल्पसंवित् ।
शक्तिः सर्वोपहासा श्रुतिभवभरतोपेक्षया नैपुणी मे,
शेषाशेषाननोक्तामलनवभणितेरग्रहा स्तूयतां कैः॥

॥९९॥

नो भक्तिर्नैव शक्ति र्नहि तव चरणेष्वेव गाढानुरक्ति-
-र्वेदादीनामधीतेरविरलतपसो नास्ति स्वात्मन्यभीतिः ।
आचार्याणां पदाब्जे रतिरपि, विरतिः कामदोषान्ननीतिः
सन्ध्योपास्तिर्न मातस्त्वमिह मम गतिः सर्वदाव्याद् गतीशा॥

॥१००॥

देशे स्युः साधुनीतिर्युवजनमनसां धर्मरीतिश्च प्रीतिः
शौर्योत्साहोच्चमेधास्वमितफलसुदाङ्कता प्रान्तिनाञ्च ।
गावः पूज्या वदान्या नृपतिनरवरा राष्ट्रमानृण्यपात्रं
नार्यः सम्मानहृष्टा बुधजनगुरुता ज्ञानविज्ञानवृद्धिः॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥१०१॥

गङ्गास्तोत्रं नराणां हरतु भवमलं स्तावनाल्लोकव्यृद्धिं,
गङ्गाह्यष्यत्वनूपात् परिहृतबहुधामेध्यवस्तूग्रदोषा ।
देवा यक्षा मनुष्याः पितर उपखगाः पाशवो जीवनापो,
मोदन्तां, तीरवासः पिबतु निशिदिनं गाङ्गमेवात्र लोकः ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

# गौरी स्तवः

॥१॥

वेदा वेदविदो नमो विदधते प्रामाणिकीं कुर्वते
स्वात्मानञ्च परं नमन्ति कथमप्येकान्ततः संस्थिताः ।
तस्यै सर्वमहेश्वरार्घमहसे शश्वत्प्रकाशात्मने
विश्वोत्पादिगुणत्रयात्म-वपुषे देव्यै नमस्कुर्महे ॥

॥२॥

सम्पूज्या द्युसदांगणैर्गुणमणी रत्नोच्चवारांनिधिः
सृष्टिस्थानलयां यदीक्षणवशात् प्रादुर्भवन्ति क्षणात् ।
मोहामन्दजडः स्तुतौ परिकरप्रेप्सापरीतान्तरः,
क्वास्मि, श्रीःकरुणापरायणमनाः सा मां हृदाऽधास्यति ॥

॥३॥

त्रैतापं शमयन्निभालनवशाद् वर्षं विनाऽप्यानयन्
निर्वाणं परितोहरन्नतितरां गाढान्धकारोत्कम् ।
कामाद्यङ्कुरमानसक्षितिभरं मुष्णन्न संवर्धयन्
कश्चित्कालतनूद्भवो विजयतां लोकेषु रैवारिदः ॥

॥४॥

मूर्तौ या प्रथते जुहोति हविषा या जीवनं जीविनो
याऽलं दूरयते तमस्ततमिदं या प्राणदा प्राणिनाम् ।
शब्दो यां समवैति, ये जनयतो रात्रिन्दिवं स्पर्धया
सा प्रत्यक्त्वविभाविता भवतु नः कल्याणदाम्बा शिवा ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।५।।

शेषाय प्रणतोऽर्धकान्तवपुषः शीर्षे किरीटायते
कण्ठे माल्यगुणायते कटितटे काञ्चीयते कोमलः।
सौभाग्यात्कटकायते चरणयोर्हस्तेऽङ्गुलीयायते
फूत्कारैर्मधुरैः सुगन्धिभिरहो यो मन्दवातायते।।

।।६।।

पुत्रस्नेहभुजो मृकण्डुतनयं शैलादिनन्दीश्वरान्
व्यासादीन् विधिना कृताल्पवयसस्त्वत्पादयोराजुषः ।
अज्ञान् दुग्धमुखाँस्तपस्यभिरतान् कृत्वाचिरञ्जीविनः
कैनाशीध्रुववागुराशमनतो, मृत्युञ्जयायै नमः ।।

।।७।।

सेव्या सैव, शिवानुरागरसिका तां संश्रयन्ते तया
पूर्णोत्थापनमस्य सर्वजगतस्तस्यै समर्प्य समम् ।
तस्या नन्दति मुक्तयोगिनिकरस्तस्याः समर्चा सदा
तस्यामायततां सदा मममनो नित्योत्सवायां शुभम् ।।

।।८।।

सिद्ध्यै या समुपास्यते चरणयोर्देवाधिदेवैर्मुदा
या वेदैरधिशय्यते शतमुखै ऋग्भिर्नमद्भिः सदा।
स्वाराज्यं च परित्यजन्ति विबुधा यद्भूरिबद्धस्पृहा-
-स्तस्यै विश्वधुरीभुवे सुखसुवे गौर्यै नमो मुक्तये ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥९॥

नृत्यद्भूतपिशाचभैरवगणं वेतालिकासङ्कुलं
भ्राम्यद्रुद्रसहस्रबाहुतुमुलं माद्यद्गुहैभाननम् ।
निर्मांसास्थिटणद्झणद्घनभयध्वानं श्रयन् ताण्डवं
यत्पाणिग्रहणादधात् शिवपदं तस्यै हि चित्यै नमः ॥

॥१०॥

पीयूषांशुसुधासरोवरभरे तद्ब्रह्मरन्ध्राद्भुते
व्युत्तानास्यसहस्रपत्रविकसत्पद्मासने कासतीम् ।
सौन्दर्योदितसागराङ्गबहलां गौरीं शिवालिङ्गितां
गङ्गोत्तुङ्गतरङ्गभङ्गसुभगां वामार्द्धकान्तां श्रये ॥

॥११॥

सान्द्रानन्दरसोद्धुरां भगवतीं सार्वज्ञचूडोत्तरां
चन्द्रोद्भासितमूर्धजां स्मितसुधासाराभिवर्षाम्बुदाम् ।
धीरैः शीतसमीरणैः सरसिजाकम्पैः समासेवितां
ध्यायामः करुणारुणां स्थितिजनुःसंहारकार्योज्ज्वलाम् ॥

॥१२॥

साहङ्कारमहाट्टहासविगलद्धारासहस्रोद्धुरां
ब्रह्माण्डातिविशङ्कटोदरलसत्कल्लोलमालाकुलाम् ।
अस्तव्यस्तसमस्तसृष्टिविकटां गङ्गां प्रपातोद्धतां
दृष्ट्वा सेर्ष्यमिवोहिता प्रियतरेत्याहो रतेर्मुग्धता ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।१३।।

सौभाग्यं यदनन्यवामनयनालभ्यं हरः सुन्दरः
त्रस्यल्लोकजुगुप्सयाङ्कितगलः काकोलकापानतः ।
भूत्युद्भासितकायवल्लिरमितोद्दाम-प्रसादप्रदः
नेत्रोज्वालविलोपिलोकविभवो सा पातु नः शाम्भवी ।।

।।१४।।

स्वर्णोट्टङ्कितहीरकादिखचिते चारूच्चसिंहासने
बालाबालवयोमहच्छविभराऽलङ्कारकान्तानना ।
ईषद्धास्यवशीकृतामितयमोद्दामस्मरान्तेश्वरा
स्मर्तव्या शरदैन्दवास्यचपलोच्चक्राङ्गशम्भूत्सवा ।।

।।१५।।

लक्ष्मीं नर्मवचोभिराब्जमहिषीं सम्मानसम्भाषणै
रैन्द्रीं सुस्मितवीक्षणैः सुरजनीस्ताम्बूलदानादिभिः ।
कैलासाप्सरसः कलासु कुशलाः सङ्गीतनृत्येक्षणै
रासम्भावयता नयेन नितरां सर्वेश्वरी राजताम् ।।

।।१६।।

नो दर्शैर्न च पौर्णमासरचनैरग्नीनुपासिष्महि
प्रोच्चैर्विश्वजिता यजामहि कथं दीनेषु दैन्योद्धुराः ।
शक्त्या तन्महि सर्वयाजकगणं सत्रं सहस्रं कुतः
तस्मात्ते चरणाम्बुजे निपतितान् नः पाहि गौर्यम्बिके !।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।१७।।

श्रीविश्वेश्वरि ! विश्वनाथकरुणे ! आनन्दमूर्ताम्बुधे !
कैलासाधिपते ! गणाधिपगुहेन्द्राद्यैरुपास्यान्तिके !।
दुर्वासःप्रभृतीष्टसेव्यचरणे ! लोकार्त्तिहन्त्रीश्वरि !
नित्यं रक्ष गिरीन्द्रजे ! गुणमये! त्वत्पादमात्रोत्सवम् ।।

।।१८।।

शर्वा श्रीपरमेश्वरी सुरगणाः शर्वां सदोपासते
शर्वायै प्रथिता श्रुतिर्भगवती संरक्ष्यते शर्वया ।
शर्वायाः समुदेति विश्वमखिलं लोकेषु सर्वे वशाः
शर्वायां च विलीयते जगदिदं ब्रह्मासि शर्वेऽम्बिके।।

।।१९।।

आनन्दं चिन्मात्रमद्वयमतद्भिन्नं प्रकाशात्मकं
कूटस्थं श्रुतितत्परं कणकणव्याप्तं परोक्षेतरत् ।
सर्वोपाधिविवर्जितं मुनिगणैर्मृग्यं हि तत्त्वं परम्
छायान्दोलयतीह सृष्टिकृतये यस्या जयेदम्बिका ।।

।।२०।।

चष्टे तस्य सरस्वती भगवती वाचि, स्थिताऽग्रे रमा
माङ्गल्या उपपद्यते, सुरगणा लोकेऽनुरुन्धन्ति तम् ।
रक्षोयक्षकुवेरनागनिकरा तस्मै, नयन्ते नति-
-मुच्चोच्चैःपदमानमन्त्यपि यदि त्वं स्वान्तमादित्ससे ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।२१।।

वृंहन्त्यद्भुतसौभगोच्छ्रितमणौ द्वाराङ्गणे हस्तिनः
वल्गन्त्यान्तरशौर्यकौशलभृतो योधा मदाधायिनः।
ह्लेषन्ते हरितामुपात्तविजया अश्वा स्थितामन्दुरा
जागर्तिर्बहु मङ्गलैः स्तवगणैर्यत्स्वान्तमादित्ससे ।।

।।२२।।

उत्तालाप्रतिमोर्मिरिङ्गणसमाकूपारगर्जाश्रया
उद्दामप्रभयर्द्धिरत्ननिचया पूर्णा धराऽर्णोद्धुरा।
जायेवाङ्कमुपेत्य सौख्यजननैर्यान् रारमीत्यावशा
नूनं तैः समवापि सौरभलवस्त्वत्पादपद्मोद्भवः ।।

।।२३।।

आनन्दामृतपूरनीरधिलसल्लावण्यलीलानिधिः
क्रोडान्तश्चरणालिकश्लिषहरा गौरी मुनेर्दुर्लभा।
उद्यद्यौवन - सुन्दरारुणरुचिः, खेलाविलासोत्सवै-
-र्मोमोदीति हरेण सार्द्धमनिशं भूयाद् हि मोदाय वः ।।

।।२४।।

श्रूयेथा मनसाप्यगम्यवसुदा, निःस्वा हि श्रूयेमहि श्रू
अङ्गैः षड्भिरुपासिता, कणकणैः स्पृष्टाः समुष्येमहि ।
त्रैलोक्यश्रियमुद्वहत्स्मितकणा लेशेन हृष्येमहि
किन्तु त्वच्चरणाखिलस्वदमहैः स्तोकं न मुच्येमहि ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।२५।।

मुग्धैस्त्वं सहकार ! मङ्गलरवैर्जागर्यसे कोकिलै,
र्मन्दं प्रातरुपेत्य सूर्यकिरणैरुद्वाह्यसेऽङ्गव्रजे ।
चेतोहारिमधुव्रतस्तवकलैर्नृत्यैश्च मोमुह्यसे
नूनं प्राग् गिरिराजराजतनयापादः समार्चि त्वया।।

।।२६।।

भक्त ! त्वं सुरदीर्घिकाजलकलैर्जेगीय्यसे मङ्गलैः
प्रातः प्रातरुपेत्य मन्दपवनैरुद्वर्त्यसेऽङ्गे तटे ।
कर्णान्तर्मधुरैः सुधीश्रुतिरवैराकृष्यसे नित्यशः
नूनं जन्मनि जन्मनीशशिवयोः सेवाफलैःप्राप्यसे।।

।।२७।।

यैस्त्वं नासि सभाजिता न च नुता, नार्चिष्ठकाः सादरं
नान्विष्टानिशमास्थया गमनतः पुण्याचलानां गुहाम् ।
पुण्यं तीर्थमपाश्रितालसतया नागामि यैर्मानवैः-
स्तैः किं श्रान्तिपरायणैरपि सुखं प्रापीह लोके शुभम्।।

।।२८।।

गङ्गां स्नान्ति लषन्ति नो परवधू कारुण्यमातन्वते
स्वप्नेऽपीह परस्वमाददति नो पूर्तादिमाबिभ्रते ।
त्वत्पादौ परिपूजयन्ति महितौ दीनान् भरन्त्यास्थया,
ते भक्ता विश्रुताः समानिषत वै, विद्याव्रतस्नायिनः ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥२९॥

नित्यानादिहरांशकालघटिता नेमे प्रयान्त्यब्दकाः
किन्त्वेताञ्जनजीवनस्य शकलाँल्लुम्पन्ति शालावृकाः।
तस्मात्त्वं शिथिलाश्रयं परिगतः साद्यस्कपातोन्मुखं
स्मारंस्मारमिदं द्रुतं व्रज सखे ! गङ्गोमयोर्भाजनम्॥

॥३०॥

यद्बाह्यं परिलभ्यते जडतमं वस्त्वर्थसंसाधकं
तन्नान्तः परिलक्ष्यते, विपुलितं साभासमत्यद्भुतम्।
किन्त्वङ्गस्फुरणं तथा शकुनयः स्वप्नाः प्रमिण्वन्ति यत्
सर्वस्यास्य निदानमेकमनिशं शैवं महो मन्महे ॥

॥३१॥

विद्वांसो हृदिमोदयन्त्यपि परागर्वाक्प्रमेयस्थितां
पश्यन्तो विशदां मनोहरतमां बालेन्दुचूडान्तराम् ।
वाचालङ्कृतिमञ्जुलां प्रमुदितां दिव्यासनाधिष्ठिताम्
मागौरीं स्पृहयन्ति येऽपि धनिनो धन्याश्च भूजानयः॥

॥३२॥

सौभाग्यं शशिनः समाकलयितुं शक्नोति कः, सेर्ष्यया
कन्दर्पैककलाविलासरसिकश्चूडेन्दुरस्तीकृतः ।
नान्योपायमवेक्ष्य पादकमले नम्रस्य तस्यालिकः
राजद्दिव्यविभैः करैश्चरणयोर्यस्तद्रजो मृष्यति॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।३३।।

खेलत्कौतुकमण्डपे गिरिभुवां कौमारिका लासयन्
नानावञ्चनतत्पराः प्रहसिता रामा जयन् सर्वतः।
नैपुण्याद्भुतसागरोऽस्म्यहमितिर्यावन्मनस्युद्गता
तावत्सेन्द्रियचित्तमोहकरणाद् गौर्याः स्मितान्मोषितः।।

।।३४।।

तां नित्यं प्रणमामि यामि शरणं तस्याश्च तां प्रार्थये
तां स्वप्नाहितसार्थवागुपहितानर्हस्तवैः संस्तुवे।
तोष्टूयेऽयुतशस्तकञ्चपुरतो नृत्यामि तां संश्रये
तां विश्वेशविशेषमूर्तपरमप्रेमां प्रपत्तुं यते।।

।।३५।।

स्थाणुर्वृद्धतमो जडीकृततनूयोगासनो धूर्जटि-
र्मुण्डस्त्रक्परितःकरोटिरणनानन्दो जगन्नीरसः।
यस्याश्चीर्णतपोलसन्नवकलोन्माद्यन्मनोदर्पको-
-च्चञ्चच्छस्त्रकटाक्षलेशपतनात्तूर्णं प्रतीपायितः।।

।।३६।।

ध्याने सुन्दरमाननं स्मितसुधं पश्यामि भास्वद्विभं
स्वप्ने त्वत्पदयोःस्पृशन् प्रतिदिनं जागर्मि भर्माहतः।
गच्छन्तीमनुसंदिधीर्षुरभितः पश्यामि लीलोत्सवां
तस्मात् श्रीगिरिजे ! प्रसाद्य हृदयं चित्यै स्वमाविष्कुरु।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।३७।।

वोढुं शक्यत एष नैव विबुधोपेक्षोग्रदिष्टः कलि
र्निर्मर्यादवपुर्हरन्मतिबलं कुर्वीय किं चण्डिके !।
चेतः क्षुभ्यति निर्निमीलति दृशि लोॅलूय्यते विग्रह-
स्तन्मां धाव दयानिधे ! दितिसुतेष्वैतादृशो घातुके ! ।।

।।३८।।

सूक्ष्मा याऽनभिवीक्षिता बुधगणैस्तर्कायुधायोधनै-
र्नानाङ्गैर्निरवाचि न श्रुतिगणैः सदसद्विलक्षात्मिका।
सर्वानन्दकलाः स्फुरन्ति च यया वस्तुष्वमेयात्मिका,
लावण्यामृतसागराभ्युदयतां गौरी गुणाधानिका।।

।।३९।।

कौन्तेयं तपसा समाहितमनःक्षीणाङ्गमालोक्य या,
भिल्लाय प्रमथान् षडास्यगणपं संप्रैरयत् स्वायुधम्।
शम्भुं भिल्लपतिं स्वयं वनचराहार्याङ्गभूषादिकं,
कृत्वाऽदापयताहितास्त्रकलया युद्धात्तुतुक्षोःशिवात् ।।

।।४०।।

सप्तर्षौ समरीचिवीचिनिचये वैवाहिके मण्डपे,
आंरब्धुं विधिना विवाहकरणं प्रोचुः शिखा बन्धितुम्।
तत्रर्षौ विबुधे शिखापदमलं व्युत्पादितुं पृच्छति,
शीङोह्रस्वकृते "ख" प्रत्ययपरे त्वौणादिनान्योऽब्रवीत् ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।४१।।

शीङोप्यत्युपसर्गकाञ्जनिभृतःलोकेऽतिशेते विना
-हेतुं पूर्वपरार्धलोपकरणात् कर्त्री शिखा साध्यते।
कर्तृत्वं प्रविहाय साधिकरणे "शेते चितिर्यत्रसा"
कश्चित्साधयते प्रवृत्तिमननाद् ब्रूते तदर्थं तथा।।

।।४२।।

जागर्याच्छ्रुतिपूर्वकर्मकरणे श्राद्धादिसान्ध्याह्निके
बध्नीयाच्चितिबोधनाय नियतं तां, तत्फलायान्यथा।
कर्मानर्हतया विबोधरहितस्योन्मुक्तबन्धोच्छिख-
स्यैतद् व्यर्थमघोषि कर्मनिखिलं विद्वभिः श्रुत्यादिभिः।।

।।४३।।

गार्हस्थ्यं वसता जनेन निभृतं चेद्रक्षिता ना शिखा
नूनं नातिशयोऽस्ति तस्य जगतां मलेच्छायितस्यात्मना।
ऋद्धिः क्वास्ति क्व संततिः सुखमयी कार्येषु नैरुज्यता,
दैवं यैर्न कृतं निबन्धितशिखैः पैत्र्यं न कर्मोत्तमम्।।

।।४४।।

प्राक्मूर्धोढशिखा विदो विधिहुताग्नीन्द्रेशपैत्र्या मुदा,
दत्तानीतिमदूर्ध्वमूर्धचरणाः, पश्चात्तुरीयाश्रमे।
मा सुप्याच्चितिरेधतां निशिदिनं मिथ्याजगद्बोधनात्
कृन्तन्त्येव बहिः शिखां सुयतयो लब्धावबोधोच्छिखाः।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।४५।।

'खं' शून्यं 'श्यति' मोषयत्यपि शिखा, बौद्धानुयायी यतः
सर्वं शून्यमवेत्य कृन्तति शिखां नामास्ति सार्थं नु किम्।
कर्मप्रत्ययतः 'शितं खं यया', लोपात् शिखा सार्थिका
शृण्वन्ती बहुशास्त्रसाधुवचनं प्रीताम्बिका पातु वः।।

।।४६।।

का ते वल्गति मूर्धनि प्रियतमा, कस्तेऽपि प्रेयानिति
गङ्गेत्युत्तरिकाश्रुतिः, विधिरयं पाशालकः पूर्विकः।
हेयातां प्रियवाग्रसैरभिहितौ, ना ना वचस्तूभयो-
रङ्गीकृत्य न संजहामि, जयतां पूर्वोत्तरीये श्रुती।।

।।४७।।

पादाभ्यां प्लवितुं समर्थयति यस्त्वाकाशमाहस्करा-
-नन्तोदारमपारतापनिवहज्वालायितं योगविद्।
सोऽपि त्वच्चरणारविन्दमधुराधारं विना न क्षमी
कैवल्यं समवाप्तुमम्ब तदरं भक्त्यानुगृह्णातु माम्।।

।।४८।।

प्रातः स्नानमपारपुण्यसलिलायामाह्निकं नित्यशः
गोधौ भस्मत्रिपुण्ड्रकं प्रतिदिनं श्रीविश्वनाथालये।
निर्वाणाङ्घ्रिगतिस्त्वमेयसुकृतश्रुत्याभिषेकः परो
येषां ते नरविग्रहा हरमया नन्नन्ति तेषु प्रजा।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥४९॥

दन्तस्तूत्पतिता दृशिर्विलुलिता स्थाता कचं श्वेतिमा
पादो न व्रजिता, कटिश्च जडिता निम्नां दशां वेशिता।
जिह्वोच्चारणवैभवं न गमिता स्मर्ता न धीः पश्चिमं,
ज्ञात्वान्त्यं परिणाममप्य-त्वपनयाल्लिप्सास्ति चेत् किं ब्रुवे॥

॥५०॥

तद्ध्येया व्रततेः प्रकृष्टकटकाङ्गुल्यादिभूषावृता
सच्चम्पारशना सुपद्मरचितस्रक्शोभिवक्षःस्थला।
लीलाम्भोजभुजाङ्गदा नवशिफालोप्तश्रवःकर्णिका
दूर्वाश्रीफलकर्णिकारमुकुटा लोभापहा साम्बिका॥

॥५१॥

शक्तिं नीलमणिप्रभां मृदिगतां संस्थाप्य, पुष्पादिभि
स्त्वां श्रद्धातिशयं समर्च्य रुचिरं नाम्नां सहस्रैर्मुदा।
लङ्कास्थो रविवंशशेखरमणी रामो यमे भीतिदं
दुर्दान्तारिविशालराक्षसचमूं लङ्कापतिञ्चाप्यहन्॥

॥५२॥

निष्ठा स्वापहतौ न कापि मनसि व्याप्नोतु केषाञ्चन
नो धिप्सा नयधर्मसत्यविषये जागर्तु लेशात्मना।
दैन्यात्तापभृतां बुभुक्षुवपुषामग्रे न पीडाप्रदा
मिथ्याहङ्कृतिकूर्दना प्रभवताद् यूनां मनःस्वम्बिके॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।५३।।

बोधो मूलमवाप्नुयाद् युवजनेष्वाप्नोतु नो वासना
सर्वोच्छेदकरी, कुलीनललना वाराङ्गनीयन्तु नो।
लोकाध्यात्मसमस्तवित्तिनिरताः पूर्वे वयस्यासतां,
पाश्चात्यानुकृतार्द्धनग्नवसना नैक्ष्यन्त बालाबलाः।।

।।५४।।

आचारागतसत्पथे यदि जनो दुध्वूर्षति च्छद्मना
सुष्मूर्षत्यनवद्यसाधुवचनं स्तोकं न विद्याविदाम्।
रिप्सत्यातुरचित्तलोभवशतः कृत्यं प्रमानाश्रितं
किं तस्य प्रजनेर्भवत्वजननं सद्योमृतिर्वाऽथवा।।

।।५५।।

कृच्छ्रं यो तितरीषति प्रसृमरं शौर्योन्नयाभ्यां तथा
भीतेरार्तिरिरक्षिषाप्तशरणं तित्रासते प्रोत्सहः।
सत्कीर्त्या च वुवूर्षते त्रिभुवनं सौख्ये दिवं मित्सते,
नूनं त्वच्चरणाम्बुजामलरजोमूर्ध्नाऽधृताधित्सति।।

।।५६।।

शत्रुः सिष्मयिषु र्विवर्धिषु कुलं वश्ये विवत्सुः सुतः
चित्तं स्वे कुलदैवते रिरंसिषु प्रेप्सूत्तरं गौरवम्।
भार्यान्तःकरणे विविक्षुमधुरोल्लापा यशोदायिनी
ध्याताम्बाम्बुजपादनामतपसो भ्रातः फलं नान्यथा।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।५७।।

ये लब्ध्वाकुलकर्मतः शुभधनाः सत्क्षेत्रपात्रादिकं,
दातुं प्राप्य दरिद्रति द्विजजनाः स्वात्मानमाबिभ्रति।
तीव्रोत्ताररयं तटं पिपतिषुं तिष्ठासतां दृप्यतां
वृक्षाणामिव नात्मनां गतिमहो दैवाद् बुभुत्सन्ति ते।।

।।५८।।

नेतॄणां वितथोन्निनीषुवचसामात्मर्द्धिमालिप्सतां,
जेतुं लभ्यमतानुजल्पितमनोहार्युग्रभेदात्मनाम् ।
मिथ्यादीनदिधीर्षतामनितरस्वात्मोपभोगाहृतां
देशस्वञ्च चिचीषतां परधनागारे, गतिं किं ब्रुवे।।

।।५९।।

अन्नानापमुमूर्षतां पथि परस्वादेर्लुलुप्सावतां
क्षेत्राण्याहरतां च जातिविषतः स्नातानुलिप्तात्मनाम्।
रात्रौ निर्दयतो भुशुण्डिनिकरैः सुप्तान् जिघांसावतां
लोकानां कृतसर्जनाः परिहसन्त्येते विधीन् नायकाः।।

।।६०।।

नेच्छामः सुरलोकराज्यमखिलं नैवं लषामः सुखं,
धित्सामो न समग्रभूमिनृपतां नो विस्तितीषामकः।
सौहार्दाद्वसतां स्वभारतभुवां भेदाङ्कुरोत्पित्सया
वल्ली जातिविजातिभेदविषजा स्वल्पापि चेदङ्कुरेत् ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥६१॥

वृद्धाः सन्तु समाहिताग्रमनसा त्वत्पादसेवारता
निर्दग्धस्वपरात्मभावमलिनान्तर्वासनानिर्मलाः ।
यूनां सत्पथबोधना हृदयभूश्रद्धासमाराधिता
मूलं ते हि यतः समुन्नतिगते, दुर्खं हि तेभ्यो विना ॥

॥६२॥

विद्यायां धनसंग्रहे नयविदे प्रारब्धसम्पूर्तये,
बाधोत्पातविशङ्कटातुरमनोमार्गावबोधक्षणे ।
चित्तोन्मादमहामलीमसतमोमोहद्रुमोत्पाटने,
सेवस्वैकमनीश ! मित्र ! निपुणं तत्तद्विदं वार्द्धकम् ॥

॥६३॥

मांसं प्रस्थमितं, तनुः, परिनता वृद्धायिताङ्गप्रभा,
ग्रातिर्दुस्तपसार्ज्यमानविविधोद्विद्यागृहाणां मुदा ।
निन्दाऽऽचार्य गुरुप्रसू-कविविदां चित्ते सगर्वाङ्कुरं
यूनां . भारतवासिनां तिरयतात्सद्यः पराम्बाधुना ॥

॥६४॥

स्वाराज्यं नृपतिर्वरं कुलजनी, पुत्रादिकं गर्भिणी
आचार्यं च द्विजः, स्वधीतिनिरतो विद्यां, कृषिं कर्षकः ।
वाणिज्यं वणिजां सुतो, रिपुजयः शूरो रणप्राङ्गणे
गौरीहस्तिमुखोभयाङ्घ्रिकमलध्यानाद् विना क्वाप्नुयात् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥६५॥

मङ्गल्योल्लसितं सुभक्तमधुपोद्घोषान्वितं स्वस्तिकं
गण्डोद्भूतमदाद्भुतप्रभझरी-संप्लावितं संस्तुतम् ।
निम्नौन्नत्यजुषोदरेण सहितं गौरीगणेशं वपुः
प्रत्यूहं हरयत्स्वदेशजनुषां धेयाज्जयं मङ्गलम् ॥

॥६६॥

देवैरिद्धबलं बृहद्भुजबलैः सन्नद्धमाग्नेयकैः
कर्णेष्वागतनामशत्रुभयदं ज्वालोद्भटं भारतम् ।
पाकारेर्महिषस्य सैन्यमथनायोद्यत् त्रिशूलासिभिर्
गोरीजित्पृथिवीप्रभृत्यशनिभिस्त्वौग्रं वपुर्नम्यताम् ॥

॥६७॥

आर्त्तो रोदिमि प्रोच्चकैः किमथवा हर्म्याद् गिरेःशेखरा-
दाक्रोशन्निपतामि लुण्ठकभयात् काश्मीरहिन्दूत्तम! ।
इत्यानल्पविकल्पनाः परिहरेस्तोषं मतावावह,
व्यस्मार्षीः पररक्षणव्यसनिनः किं पूर्वजानात्मनः ॥

॥६८॥

देशोऽयं शशिशेखरः शिवशिरः कश्मीरभागो महान्
इन्द्रादेरमरावती, 'निगमयोस्तन्त्रादिशास्त्रप्रसूः ।
तत्रातङ्कनिवारणाय यततां, स्थूलात्मनाफेरवः
किं वल्गन्ति विपाटितोन्मदगजात् सिंहात् पुरो जाग्रतः ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।६९।।

गर्जातो विकलेन्द्रिया विरहिताभ्यस्तास्त्रशस्त्रायुधा
आत्मादर्शनमिच्छवः समरभूभागाद् गुहामाश्रिताः ।
कातर्यान्निघ्नन्ति साधुचरितान् ते चेन्नरा, राक्षसा
उच्यन्तामिह कीदृशा, द्रुततरं छिन्दन्तु शीर्षेषु तान् ।।

।।७०।।

हे उग्रे ! शिशुयोषितः स्थविरकान् गार्हस्थ्यमाबिभ्रतः
आग्नेयास्त्रभयङ्करज्वलनसात्कुर्वन्ति ये स्वापगान् ।
तान् सद्यः हलपोत्रदन्तनिशिताग्राच्चूर्णसात्कुर्वती,
त्रैनेत्रानलदग्धसर्ववपुषः श्वभ्रे चिरं स्वापय ।।

।।७१।।

रे पाकाः ! शशफेरवः ! परधनस्वापापहारा ! इमाम्
पृथ्वीराजमहाप्रतापशिवराजाग्रान् न जानीत किम् ।
सद्यो भाजयतात्मदेशशरणं प्राणान् जहीताऽथवा
पन्थाऽन्यो नहि विद्यते युधि महाशूरात्पुरो भारतात् ।।

।।७२।।

पाकस्ते नयसैन्यकोशजनतानां ते यदा प्रारभि
वृद्धानां नयदर्शनादपगतो भ्रान्तस्तदासीस्ततः ।
भस्म स्वत्वमवेक्ष्य पाक ! विकलेनापि त्वया युध्यते,
धिक् ते नीतिबलान्यमात्यसुहृदो, मूढस्य ते का कथा ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।७३।।

नाम्ना केवलमेव साधुसदृशो मन्त्री शरीफोऽभवत्
सोढुं ना प्रभवे दृशा निगडितं कृत्वा गृहेऽपातयः।
सत्ये साधुशरीफजीवविषये कां ते स्थितिं भावये,
धन्योऽसाधुशिरोमणिः खलमतिः पाकासि तुभ्यं नमः।।

।।७४।।

एको धर्मसनातनः समुदितः सृष्ट्या सह ब्रह्मणः
पूर्णः सर्वहितो ऋतम्भरदयासत्याद्यहिंसामयः।
आदायांशमनेकसाधुपथिका धर्मान् व्यकल्पन्त तान्
यानादाय खिलान् कचाकचि महत् कुर्वन्ति मोहान्धकाः।।

।।७५।।

धर्मो नास्ति कचाकचि, प्रकुरुतां कृत्ये स्वके नैपुणीं
वर्णान् यान् चतुरो वदन्ति महितान् नोच्चावचं तेषु हि।
पूजापात्रमिहास्ति केवलकला, नैवास्ति लिङ्गं वयः
तामाप्तुं यततां स्ववंशकृतिभिस्तुल्योऽसि वर्णोत्तमः।।

।।७६।।

लोकस्याभ्युदयाय, कोऽपि तपति प्रौढौष्णशीतादिषु
कृच्छ्रं श्रौतपरायणः रिपुगणानादण्डितुं चापरः।
दुर्लङ्घ्याम्बुधिदुर्ग्रहान् वसुमणीनादातुमन्यस्तथा
एको गोकृषिमेधितुं, खपवनाम्भोभूकलाज्ञाः क्रमात्।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।७७।।

विद्या वास्तु कलास्तु वा बलवतां मध्ये प्रतिष्ठा परा,
नैरुज्यं तनुभिर्धनं धनवतां सौख्यं यशोवर्धनम् ।
एषां मूलमवेहि कर्मसु तपो, नैवं सखे चेतरत्
तस्माल्लोभमनेकदोषजनकं हित्वा तपः साधय ।।

।।७८।।

आक्षिणवत्तनवो मलिम्लुचभृतः स्वान्तःप्रविष्टेक्षणाः
क्षुत्तृट्पीडितचेतसो दशदिशः शून्याश्चरन्तो जनाः ।
औत्पाते भुवनेश्वरे ग्रसति यद् दृश्यं हृदादारकं
भूयो मास्तु मनुष्यपाशवखगाक्रन्दं कदापि प्रमे !।।

।।७९।।

तूर्णं रक्षतु देवि ! भारतमिदं प्राकम्पिझाम्पादिकात्,
पाश्चात्यादृणपीडनाविलुलनाद् दुर्भिक्षमूलात्सदा ।
यूनामायतिसन्मतिर्निजकृतौ धर्माविरुद्धाश्रया
आभूयात्करुणाम्बुधे ! तव दृगन्तैकानुपातादिना ।।

।।८०।।

प्राणन्तु प्रगुणाः समाजमनुजा निर्भीति गावस्तथा
सर्वेऽपि समंजा, निरीयुरखिला ये हानिदा दस्यवः । ल
किन्नु जाग्रत भारताः सुमतयः भीर्ष्याकषायः कुत- !
स्तेऽन्तःस्वच्छहृदं समेति कणशः शोचन्तु कुर्वन्तु च ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।८१।।

सङ्कल्पागतदार्ढ्यनिश्चलमनःशौर्यैकपात्रं युधि

शत्रूणां गतिशक्तिसैन्यमहिमाकार्यज्ञसर्वज्ञकम् ।

लोकग्रासरतप्रसक्तप्रलयाटोपं विधुन्वत् क्षणं

सैन्यं धौर्जटि वा वपुर्विभरतात् नो भारतं सर्वदा ।।

।।८२।।

कैलासालयभाललोचनरुचा वाह्नेन दिव्यास्त्रवत्

सर्वोत्तुङ्गधराधरोर्ध्वशिखरैर्वावैजयन्तीवहम् ।

सर्वैर्द्वीपकुलैरपीडितपदं सेवानतैरादृतं

भायाच्छम्भुवपुः स्वभारतमिदं दुर्धर्षशत्रूञ्जयम् ।।

।।८३।।

स्वाधिष्ठानभुवं जगत्सु विदितां व्योम्नःसुयानैर्नुतां

शस्त्रास्त्रैरतुलैरवाप्तविभवैरासेवितात्मान्तिकाम् ।

दुर्भेद्यात्तपरिच्छदां नवनवोत्साहां रिपूच्छेदने

चामुण्डामपराजितां परिनुमः श्रीभारतां वाहिनीम् ।।

।।८४।।

देशे स्याद् जयघोषदुन्दुभिरवो यूनां समुत्साहना-

-सिंहध्वानविभिन्नशत्रुकवचोत्साहश्च सीमाऽखिला ।

ऐक्यं सर्वजनेषु प्राप्तसमरं, नैक्यं विचाराश्रयं

शास्त्रे शास्त्रविदां, खनिर्गुणवतां, गौर्याः प्रसादाद् ध्रुवम् ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।८५।।

शत्रुर्ध्वस्तबलो मती रिपुगणैः स्वप्नेप्यमेया, बलं
भीमं, भीष्मसहस्रबाहुबलिनां विस्मापकं साहसम्।
अञ्जन्याः सुतवद्गति नृपरतिः सर्वेष्टयो धेनवः
शुद्धाः सस्यसमन्विता च पृथिवी नार्यो भवेयुःसुखाः ।।

।।८६।।

वीथ्यामेव कलाविधाननिपुणाः स्त्रीष्वेव मोदावहा
नानामोदसुगन्धिलिप्ततनवः कुञ्चत्कचाङ्कालिकाः ।
कूर्चश्मश्रुनिकृन्तनाबलजनाभापीतचन्द्रानना:
शृङ्गारैकरसा हि नैव तरुणा, ओजस्विनोप्यासताम् ।।

।।८७।।

सूर्यश्चण्डकरैः समग्रभुवनं यावन्न सन्तापयेत्
चन्द्रः स्वामृतदान तर्पितसुरं स्वर्गं न सम्भावयेत् ।
पद्मं लोकविलोचनार्पितमधुस्यन्दिप्रभाभास्वरं
सौन्दर्यं तनुते, न तावदयते सन्ध्याममामास्त्रजम्।।

।।८८।।

प्राप्तापीच्यतनुं तवार्चनफलं बाला मनोभूरुचिं
प्रेयांसं गुरुसन्निधौ निजतपःसम्पत्फलं वीक्षते ।
सौवर्णाङ्गतरङ्गिधामतरला साचीकृतार्धाम्बका,
अञ्चद्रोमविकासिगण्डफलकाऽधस्तिर्यगुर्ध्वेक्षणा।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।८९।।

लीलालोलदृगन्तपातविवशान्तःस्नेहकम्पद्रवो
व्याजात्तन्मुखमीक्षितुं विविधदृग्व्यापारमासज्जते ।
लज्जाभावसमाकुलौ, युगपदानुत्थानदृक्चञ्चलौ,
कच्चिन्मिश्रयतो दृगन्तमवशौ, द्राक्स्तब्धयोः किं ब्रुवे ।।

।।९०।।

लिप्सुस्तां स सुदर्शनो रघुवरो देव्यर्णजापोत्सवः
साक्षात्कीर्तिमिवावृतां रिपुभटैः श्रीकाशिराजात्मजाम्।
एकाकी रथमास्थितो गतभयं स्वायम्वरे तन्महे
प्रावारि प्रियया तया, रिपुगणोऽप्यालेपि कालाञ्जनैः ।।

।।९१।।

सर्वैरायुधकर्कशै रिपुगणैर्मार्गे व्रजन् प्रावृतः
साहङ्कारशराशुवृष्टिमुसलाधारैः समाच्छादितः।
त्वां नत्वा धृतिमान् ज्यया समयुनक् कोदण्डकोटी तदा,
टङ्कारेण पदा तिरस्कृतफणैः प्रोच्छश्वसे तैर्भृशम् ।।

।।९२।।

क्रोधव्याकुलचेतसो युगपदा तान् मानिनः क्षत्रियान्
बालो योधितवान् शरैररिशिरः सम्पातयन् भूतले ।
अङ्घ्रावालुठयच्छिरो नति, तनोर्नद्धं निकृत्तं द्वयं
कश्चित्तेषु न तादृशः क्षणमपि स्थित्वा पुरोऽयुद्ध यः ।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।।९३।।

'पाही' त्यारवचो निशम्य दयया प्रोचे स तानासतां
युष्मद्देहमिताः पराम्बकृपयाविष्टाः शरा जिह्यति।
सेनाधूपतयो युधाजिददरा आयत्तभूक्षत्रिया
हूयन्ते समरे चिराय सफलैरेभिर्भयं नास्ति वः।।

।।९४।।

रिक्थस्त्रीषु निवेशितात्ममतयः केचिच्छिरोहस्तका
गावः स्मेति विसंष्ठुलापरतनूवासःश्लथग्रन्थयः।
धावन्तः कुलकातरास्तवपदत्राणोद्वहाः स्मा'ब्रुवन्
सस्मित्या हि नवोढया समविता, युद्धाङ्गणे विह्वलाः।।

।।९५।।

स्वात्मश्लाघिवचःपरा गुरुधनुर्विद्यार्जने सालसा
वल्गन्तो बहुधा स्त्रियां हि निवहे शौर्यं मुधायोधनम्।
योद्धॄणां पुरतो भयावहकृतिं दृष्ट्वाऽन्तरेविह्वलाः
किंकर्तव्यविमूढतामुपगता मातुःपयः सस्मरुः।।

।।९६।।

श्रुत्वा शत्रुनिराकृतां निजचमूं केचिद्रुषा वह्निना
रक्तोज्जवालमुखाः "सुदर्शनममुं कुर्मो यमाय प्रियम्"।
वल्गन्तस्त्वरयोपयातसमराः संत्यक्तसैन्यच्छदा
नाराचैर्निशितैर्निपीतविभया सार्द्धं विमानीकृताः।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥९७॥

केचिद् युद्धपलायिता मृतिमितान् बन्धून् विलोक्यातुरा
"हापुत्राः ! सुहृदः ! कुतः प्रियतरः स्वर्गोऽस्मदापेक्षया ।
ईक्षध्वं पुरतःस्थितान् सकृदपि स्मित्या सहास्मान् क्षणा-
दित्थंघर्घरुद्धकण्ठविरुतैः सर्वान् समारोदयन् ॥

॥९८॥

वाणाग्राद् वमदंशुतीव्रतपनाद् व्यामुग्धचित्ताननः
पश्चात्पादमुपावृतो दरनतःस्थूणान्तरान्तर्यकः ।
नैकव्यावृतिभिर्विघूर्णितगतिर्व्यादाय स्वास्यं श्वस-
न्नावामीकृतकायतः स्थविरतां तारुण्यमानाययत् ॥

॥९९॥

उत्कृत्यांसविलग्नमांसमघसत् श्वा दद्भिःरावर्जय-
-न्नन्त्रात्तन्तुमुदस्य तुण्डनिशिताद् गृध्रः समाकर्षयत् ।
पूयारक्तवसाविलिप्ततनवो वेतालप्रेताङ्गना
दुर्गन्धास्त्रपटाधिवासवसना हृष्यन्ति योधाङ्गणे ॥

॥१००॥

निर्ध्वानाचितमेघशून्यचपलापुञ्जस्थिराभोज्ज्वला,
निष्कल्पान्तनभःसहस्त्रयुगपद्द्युद्यद्दिनेशप्रभा ।
स्फूर्जत्तीव्रशरेज्यचापसृणिपाशासिश्रिता ऽज्ञायि नो
नेत्रस्फारनिभालिताऽस्मृतरणस्वात्मक्रियैः साकृतिः ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥१०१॥

धैर्यं कोटिकुलाचलैरतलमृङ्गाम्भीर्यमावार्धिभि-
रौन्नत्यं ससुमेरुरुद्रशिखरैस्तेजोऽर्यमद्वादशैः।
नाऽतोलि, प्रभयाप्तमीलितदृशो योद्धुं रथाग्रस्थितां
भक्त्या प्रह्वसुदर्शनां कथमिमे चिन्वन्तु मूढाः पराम् ॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

# ऋतुचर्या

विदुषां विबुधानाञ्च लाभोन्मुखसमागमः।
सान्तरायो, यथा सन्धिर्नाटकानामनुत्तरः।।१।।

कविताकामिनीनां ताः कला गृह्णन्ति मानसम्।
रागव्यञ्जितपादानां ध्वनौ सहृदयोन्मुखाः।।२।।

अनूचानत्वमेवैकं कविद्विजतयोरलम्।
कारणं सिन्धुमुल्लङ्घ्य विश्रान्तयशसोर्ध्रुवम्।।३।।

कविता कालिदासस्य सहकारस्य मञ्जरी।
अप्यमृष्टा हृषीकेशा विमृष्टायां कथैव का।।४।।

ऋतुनां ऋतिरेवाद्या काव्यकान्तारवर्त्मनाम्।
कालिदासार्यमादृष्टप्रकाशानां भयप्रदा।।५।।

षडङ्गानीव वेदस्य कवेः षड्तवो ध्रुवम्।
अन्तस्तत्वमनभ्यासाल् लोकानां क्व विवृण्वते।।६।।

आकाङ्क्षा शब्दगा पूर्या शब्देनैव यथा कवेः।
स्पर्धनं कालिदासस्य गिरामतुलया गिरा।।७।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निशा वार्यन्त्रमणयश्चन्दनानि शुचौ सुखम् ।
हर्म्याणि मधुगीतानि वाद्यं नृत्यानि सर्वशः ।।८।।

निर्विशेषतयाऽकिञ्चित्करं कामप्रियेषु यत् ।
विशेषणं न हातव्यं ध्यातव्यं सूक्तिसिद्धये।।९।।

नितम्बस्तनकेशानां वासोहारागुरुन् विना ।
चेतोहारित्वमेवेदृग् गुणान् शब्दार्थयोर्यथा।।१०।।

प्रथमे न तपस्तप्तं ऋतौ ग्रीष्मे, वयस्यथ।
विद्यायां कालिदासस्य कवितायां वृथा श्रमः ।।११।।

मयूरफणिनोः सिंहगजयोः सर्पभेकयोः ।
शश्वद्विरोधिनोरैक्यं तपोज्योतिर्विना कुतः ।।१२।।

ब्राह्मणः सूर्यवर्चस्वी क्षत्रियो ह्लादिचन्द्रमाः ।
वैश्यः सदाम्बुतरणः वारिदानपरोऽपरः ।।१३।।

तपस्ययैव सुलभा लोके तेऽपि कृतार्थिनः।
तापो निदाघपर्याय उपात्तः प्रथमं कवेः।।१४।।

कुमारसम्भवे देव्या पार्वत्या कारितं तपः।
दिलीपेनापि सत्पत्न्या सार्द्धं रघुमुखे तथा।।१५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रीष्माभिधतपस्तप्तमृतुना रविपावकैः ।
तस्माज्जिगीषुणैवारमुद्युक्तं मेघदन्तिभिः।।१६।।

संग्रामेष्वचलान् मत्वा दर्पेणोच्चैः-शिरोधरान् ।
असहिष्णुरिवौजोभिर्गजाब्दान् प्रैरयद् द्रुतम्।।१७।।

धारासारशरापातै र्नलिनीं पाण्डुराननाम् ।
कुर्वन्नुपदृढोरस्केष्वशुभं युध्यसूचयत्।।१८।।

शूराणामेकशरणमभीदो जयदो विभुः ।
शिरोभिः सेवितः सूर्यश्छादितः प्रथमं गिरेः।।१९।।

आच्छन्नोपास्यचरणान् ध्वनिनादितकन्दरान् ।
रत्नाढ्यानचलान् राज्ञश्चलानिव व्यकल्पयत् ।।२०।।

गतिमन्तमृतुं ज्ञात्वाऽगतिकोऽचलभूपतिः ।
प्रससार भुजानुच्चैःशृङ्गान् सख्याय, मन्महे ।।२१।।

धृतान्तर्बहुरत्नोऽपि लतादिवनमाश्रितम् ।
शुष्कं नैवैक्षतेवास्मात् पराभवमगादध्रुवम्।।२२।।

रत्नच्छायव्यतिकरं धनुर्व्याजेन दत्तवान् ।
उपहारमतः प्रेम्णां द्रुतं मेघेन संद्रुतम्।।२३।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रोमाङ्कुरसमुद्भेदि सख्यं जीवनमर्पितम्।
शुष्यल्लताधितरवे स्वमित्रायाचलाय द्राक्॥२४॥

सख्यं छद्मनाशून्यं शिरोभिर्वहनैर्नगः।
व्यानङ्निर्बाधमेवातः कटके मेघबम्भ्रमिः॥२५॥

प्रतिकन्दरमेवान्तः पश्यन् गिरिपतेर्घनः।
स्नेहव्यक्तिं प्रदानेन वारामकृत निर्भराम्॥२६॥

सर्वत्र कृतसंचारो ऋतोः सेनापतिर्घनः।
अन्तसारमवेक्ष्यैनं भूधरत्वे न्ययोजयत्॥२७॥

दृष्टं दार्ढ्येन संरब्धं क्वापि नानतमस्तकम्।
छित्वा नीलोत्पलच्छेदं पविनाऽनमयदद्भुतम्॥२८॥

एतत्सर्वं तपोवीर्यं ऋतो वर्षासु सम्भृतम्।
अन्यथैवंविधं दीप्तं तेजः संलभते कुतः॥२९॥

तेजःशौर्यान्वितं प्राप्तवलिभिन्निस्तुलायुधम्।
विद्युत्वन्मेघसंश्लिष्टमृतुं भूश्चकमे भृशम्॥३०॥

उद्यत्कन्दलीकन्दै रोमाञ्चिततनुं तदा।
वैदूर्यसन्निभैरिन्द्रगोपैर्भूषैरभूषयत्॥३१॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कदम्बकेतकीसर्जार्जुनानां विकचैः सुमैः ।
ह्लादिगन्धैस्तया स्वीया तनुः समधिवासिता ।।३२।।

नीलराजिघनानीलसूक्ष्मवासोवृताननौ ।
हिमवद्विन्ध्यविस्तारिप्रान्तस्थूलोच्छ्रितौ स्तनौ।।३३।।

स्रवत्स्रोतस्विनीधारमुक्तास्रग्भिर्विभूष्य तौ।
आनङ्गाकर्षितुं स्नेहात्स्नेहनिर्भरमानसाम्।।३४।।

अनुदवेगकरामन्द्रध्वानैराह्लादयन् महीम् ।
मदेनोत्थितकेकाभिः साऽपि तं प्रत्यनन्दयत्।।३५।।

तापिता तद्वियोगोत्थकामाग्निज्वालयाऽक्षमा ।
हस्ताभ्यां विहंगक्वाणचूलिकाभ्यां सभाजितुम् ।।३६।।

मन्दानिलचलत्पत्रसर्जात्तकर्णभूषणा ।
केतकीदलवृत्तौष्ठदलाभ्यां हावमार्पिपत्।।३७।।

व्यालम्ब्याननं शृङ्गैर्मेघमरुणद् भूधरः ।
रुद्धकामो रसन् तस्मात्यपात वारिभिः सह ।।३८।।

भूमेः सहभुवो नद्यः स्वकलोन्मादव्यक्तयः।
रुषा तटजुषो वृक्षान् विभिदुस्तानगान् नगे।।३९।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रस्तरप्राय एवायं नगः सङ्गमबाधकः ।
अगोऽयमिति हन्तव्यं तरङ्गैश्चरणैर्हतिः ।।४०।।

मर्यादाकूलमुल्लङ्घ्य पार्श्वस्थान् भीषयन्त्यमूः ।
वुवूर्षवो निधिं वारां, प्रियं दुष्टाः स्त्रियो यथा ।।४१।।

काश्यपीयं महाराज्ञी, वसन्तो वृणुतामिमाम् ।
सम्राजोरेव संबन्धो नैवोनानूनयोर्भुवि ।।४२।।

पीतेन वाससा श्लिष्टं माधवं विद्युता हरन् ।
चित्रार्पित इवानीशो मेघ एनां लुलुप्सति ।।४३।।

बाह्यमनुहरन् लोके क्वान्तःसारं बिभर्त्तु सः ।
गुञ्जामणिः क्व बिभृयाद् वैदूर्यान्तर्गतं गुणम् ।।४४।।

प्रनुन्नस्याल्पवातेन गतिःकाष्ठान्तचुम्बिनी ।
धूम्रधूमाकुलास्याक्ष्णः स्रवतोऽम्बुकणानिव ।।४५।।

असदृशगुणवत्योर्भूनभोमात्रगत्यो-,
-रचलचलगुणेभ्यो भिन्नयोर्मेघभूम्योः ।
परिणतिविरसोऽयं सङ्गमश्चेति ध्यात्वा,
शिखरकररुधोऽयं भारतं पातु शैलः ।।४६।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः

# स्वतन्त्रता-सपर्या

## प्रथमं पुष्पम्

जीयाद् रक्ततमाम्बुजाक्षिविसरद्रोषारुणाभासया,
लक्ष्यस्कन्धमिलन्निकृत्तबहलासृग्भाररक्तायितः ।
दार्ढ्यस्थापितशीर्षपार्ष्णि-विगलत्स्वालक्तकाङ्घ्रि-र्हरन्
प्राणान् दैत्यपतेरशस्त्रमहितः कुण्ठारशूलाशनेः ।।१।।

राष्ट्रं गुरुं सेवितुमात्तदेह-
-बन्धाः प्रतापोत्तपसाप्तमोक्षाः ।
स्वतन्त्रतायै जनुषान्धराणां
सेनान्य ईड्याः प्रथमं प्रजाभिः ।।२।।

नौम्येकलक्ष्यञ्चरतां समग्र-
फलानुबन्धैश्चरणावुपायैः ।
चित्तं समाधाय तमोऽरिसङ्घान्
निरस्यतां देशपपी-यतीनाम् ।।३।।

वैदेशिकोत्थैरपि दस्युजातै
र्वेणवग्निभिर्देशवनं दहद्भिः ।
सन्त्रातमात्माम्बुददेहवारा
तस्मै नतिः कीर्तिशरीरसारा ।।४।।

दण्डैर्हताशेब्धरुषोर्ध्वमुत्थैः
संताड्यमानोऽपि जगर्ज घोरम् ।
बालो गभीरं जयभारताथ
वन्दे सदा भारतमातरं वा ।।५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

म्लानिःक्व हेम्नो ज्वलदग्निपाते
क्षत्रस्य शस्त्रास्त्रनिपातनाजे।
दृढास्थया लक्ष्यनिविष्टदृष्टेः
कालायसाबद्धकशाभिघाते ॥६॥

जीयात्स मान्योऽमलभारतस्य
सर्वेषु चन्द्राहितशेखरो यः।
लोकावनायोग्रविषोर्ध्वदण्डैः
कण्ठे हतो हृष्टतमोऽप्यतिष्ठत् ॥७॥

स्वप्नेऽपि नादीनवमल्पमूचे
आशिश्लिषे दीनजनो हृदोच्चैः।
तीव्रौजसोद्धारितविश्वमेकं
स्वतन्त्रसेनान्यमुपेन्द्रमीडे ॥८॥

स शेखरो मद्वचसा क्व गोचरो,
महानुभावः स कुतोऽल्पबुद्धिः।
पदार्थपङ्गु र्गिरिमुच्चशील-
-शैलोच्चयं लङ्घयितुं पदोत्कः ॥९॥

त्रिपाठिवंशो महसोज्ज्वलोऽभू-
-दुन्नावनाम्नोन्नत-मण्डलान्तः ।
उवास पारम्परकृत्य-दिष्ट
प्रसार एकोऽक्ष इवाब्धि-नौषु ॥१०॥



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न विद्यया कोऽपि कुलेऽग्रवर्णे
क्षत्रे न हीनः किल शौर्यसारैः ।
न वैश्यवर्गे विपुलार्थसार्थ
वाहैश्चतुर्थे कलया कृषादेः ।।११।।

वर्णाः सिताद्या जगदेकचित्रे
मर्यादया कोष्ठगताः सुशोभाः ।
विद्याविदे स्तावयितुं समर्था
श्चित्रं तथैवोन्नमितुं स्वराष्ट्रम् ।।१२।।

आकाशतेजोजल-भूमिभाग्भि
रेभिश्चतुः-षष्टिकलाभिरिष्टम् ।
विश्वं ततश्चन्द्र इवार्थजातो
वर्णः कलाषोडशकः प्रसिद्धः ।।१३।।

विप्राग्र-क्षत्रार्यचतुर्थकाद्या
वर्णाः कलाभिस्तुलिताः समानम् ।
किंमुद्रया षोडशकः कदाचि-
न्न्यूनोऽस्ति तत्षोडशकात्परस्मात् ।।१४।।

विद्याऽक्षरात्मा गगनात् समिद्ध
शौर्याणि तेजोभिरितो वणिज्या ।
अद्भ्यस्तथा भौमकला च भूमेः
किं षोडशात्षोडशतो न भक्तः ।।१५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एताश्चतुःषष्टिकलाः प्रसिद्धा
वर्णेषु भक्ता समयन्ति पुष्टाः।
देशं नियन्तुं प्रकृतिं समानि
भूतानि वा तासु कुतो विवादः।।१६।।

आसृष्टिकालर्षिमुनिप्रदिष्ट-
-पुण्याघकर्मादिफलानुविद्धे ।
श्रीभारते स्वार्थसुखाभिलाष-
-पराङ्मुखे कर्मपराङ्मुखः कः ।।१७।।

न क्वापि दृष्टापि, तथोपदिष्टा
कुर्वत्सु कर्माश्रयते कला स्वा ।
वेश्यागणः स्वीयकलाभिरीड्यो
राज्ञः सभायां श्रुतिपारगो वा।।१८।।

वर्णैश्चतुर्भिः प्रहरैश्चतुर्भिर्
वक्त्रैश्चतुर्भिश्च भुजैश्चतुर्भिः।
तुर्यैः समुद्रैर्विदिशाञ्चतुर्भिः
पुष्टा विभक्तैरविभक्तरूपैः।।१९।।

विज्ञानज्ञानादरसभ्यतासूः,
सिन्धूभवच्चारुचतुः स्तनाग्रा ।
गौ र्भारतीया भुवि साध्वसूत,
पीयूषमिष्टैव चतुःपुमर्थम्।।२०।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धन्या जनिर्भारतभूमिभागे
बाहालता शत्रुविमर्दयागे ।
दृष्टिश्च भू-स्व-र्निरयान्तरिक्ष-
-सूक्ष्मावगाहे मतिरिन्दुभाले ।।२१।।

वेदाङ्गकर्माङ्गपुराणवार्त्ता
वृत्तिर्यदीया विधिनोपदिष्टा ।
विप्रावतंसप्रवरानुवंश-
-त्रिपाठ्युपाधि र्निरुपाधिरासीत् ।।२२।।

आसाविषातां जगरानि-सीता
रामाभिधाभ्यां हि सुतौ पितृभ्याम् ।
गुणैरुदारैः कथयोरुवीर्यौ
दर्भाग्रबुद्धी सदृशौ कुशाभ्याम् ।।२३।।

उच्चौजसां मानशिखोच्छ्रयाणां
सत्याग्रशौर्यार्जवतेजसां वा ।
नीतिप्रभाभासुरबुद्धिभासां
यः शेखरश्चन्द्रसुशेखरोऽभूत् ।।२४।।

वन्द्यो न तासां श्रुत-सङ्गमः कैः
श्वेतासितारुण्यललामभासाम् ।
तज्जन्मभूः स्नेहदयोत्सवानां
त्रिस्त्रोतसां क्रोड इवास्ति मातुः ।।२५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हैमालयादित्यप्रियाङ्कभाजो-
-र्वारां प्रवाहैरभिमिश्रदेहः ।
राजा प्रयागः बलरामकृष्ण-
-मिश्रप्रभाभः कलिकालशास्ता ।।२६।।

आपःशिताः पापभरोग्रकृत्या-
-रक्षोहराश्चण्डिकया सदृक्षाः।
श्वेताश्च स्वच्छायविमोह-शुम्भ-
-दैत्यान्तका-स्तुल्यसखो हि योगः ।।२७।।

प्रायश्चितीनां प्रसरादतीत-
-पथस्थघोराघनिरासनाय ।
एकाऽपि जागर्ति महीतलेऽस्मिन्
शित्यो र्द्वयोः किं विषये ब्रवीमि।।२८।।

यद्योगिभिर्दुष्करयोगमार्गैः
शूरै रणप्राणविसर्गदक्षैः ।
सत्तापसैः कृच्छ्रतपोभिराप्तं
तत्सङ्गमे मज्जनदेहहानैः ।।२९।।

सूर्ये प्रयाते मकरे महात्म-
सङ्घः प्रयागे सुकृतैकलाभे।
आकृष्टचित्तः स्वयमेति काले
सत्कर्मभोगोऽत्र यथा जनानाम् ।।३०।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नोपासिता व्यासमुख-प्रसूतो-
-दन्तःपुराणं नहि साधुसेवा।
प्रनुन्नमप्युद्यतते न चित्तं
किं तूषरेषूप्तयवः प्ररोहति ।।३१।।

शर्मावहोत्कर्षफलान्यवाप्तुं
यो बन्धकीभूततमोऽन्तरायः।
तं दूरमुद्वास्य फलाय सिद्धः
प्रयागराजोऽस्ति स हेतुराजः ।।३२।।

वाग्मी त्ववाग् गच्छन् पङ्गुरेव
पश्यन् दृशान्धः खलु दीर्घचक्षुः।
पूर्णेन्द्रियः सोऽपि निरिन्द्रियो ना
तीर्थं प्रयागं न कदापि यो गतः ।।३३।।

श्यामीभवच्चक्षुखिास्यवाम-
-मादित्यकन्या दुरितक्षयाय।
प्रह्लादनायै सुकृतस्य तेजः-
-श्वेतीभवद् दक्षिणमस्ति गङ्गा ।।३४।।

धर्मध्वजानां बलिभक्षकाणां
हेतोः श्रितान्तर्दुरिताकुलानाम्।
सर्वोपकार्यार्यपथच्युतानां
सारस्वतं रोषकषायचक्षुः ।।३५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्वासौ त्रिनेत्रो भगवान् महेशो
भूतेषुनिष्कारणकारुणीकः ।
सन्मज्जनान्मुक्तिददो महेशान्
मन्त्रेण मुक्त्यै द्रवतो न मान्यः ।।३६।।

ये भीरवः साधुपथानवेक्षा
मिथ्याविकत्थोपहितान्तराशाः ।
आगन्तुमत्रोढमनोविकल्पाः
पतत् कुलं नो विपदां विदन्ति ।।३७।।

श्रोतुं पुराणानि विहर्त्तुमम्भो
ऽकूपारपत्न्योर्जलसन्निपाते ।
किञ्चित्फलान्नग्रहणव्रतेन
मासं मनश्चोत्कमवेहि पुण्यम् ।।३८।।

तौ दम्पती श्रीजगरानि-सीता
रामौ सुतं कौस्तुभमाप्रसोतुम् ।
स्वःसिन्धुसिन्धू तपतो बुभूषू
वक्षो हरेर्भारतमण्डलस्य ।।३९।।

कार्श्यात्तनोरप्यमनस्कतां क्व
तपःप्रवृत्तौ मनसाऽपि धत्ताम् ।
मणीप्सुभिः किं कणशोऽपि तान्त-
-मप्युत्खनावापिततानवेन ।।४०।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घृष्टेर्मणिः प्राणिजनस्तपोभिः
संस्कारतो रत्नगणश्च, वाणः।
शाणेन, तीक्ष्णाग्रमुखोऽर्थिसाद्रा
लाभोन्मुखः क्षीणतरोऽपिवन्द्यः ।।४१।।

शोभामपूर्वां दधतौ पदांती
तत्सङ्गमात् पूर्णदिनव्रतान्ते।
काशीं प्रयातश्चरणाब्जरेणुं
पूतत्वमाप्तुं दधतेऽन्तरिक्षः ।।४२।।

रात्रिः शिवा फाल्गुनकृष्णपक्षा
साम्बेश्वरामोदविधानदक्षा ।
को ज्ञानवान् जागरितुं न तस्यां
द्रष्टुं शिवं साम्बमुपैति काशीम्।।४३।।

यस्याः स्थितिर्नैव वसुन्धरायां
वासोऽत्र द्योवासिसमाजवासः ।
सा कण्टकोत्सेधनिपातदक्षा
शूलत्रिकण्टोपरि राजमाना।।४४।।

यस्यां शिवाम्बा परमेश्वरी सा
हस्तात्तदर्विः परिवेषयन्ती।
निष्किञ्चनान् त्यक्तगृहर्द्धिबन्धून्
व्यधात् ससामन्तधृताङ्घ्रिरेणून्।।४५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मीक्षार्थिनः सन्तु प्रशासितारो
वाणिज्यया श्रेष्ठिवराग्रगण्याः ।
श्रौतेष्टिसम्पादनलब्धवर्णा
वेदाङ्गशास्त्राप्रतिमप्रतिष्ठाः ।।४६।।

काशीरजः स्वर्गसमृद्धराज्य-
-लाभाधिकं चेतसि मानयन्तः ।
पदातयः शून्यपदत्रपद्भ्यां
परिक्रमन्ते शिवपञ्चक्रोशीम् ।।४७।।

कश्चित्कुतश्चित् कृतपातकोग्र-
-श्चितोप्यतीताश्रितपापराशीन् ।
वहनौ तृणानीव ललाटमृष्ट-
-स्वर्गा-पगायां दहति प्रकामम् ।।४८।।

गाढं न काश्यां यैर्गाङ्गमम्भः
पादाम्बुजं साम्बमनर्चितं यैः ।
नाश्लाथि च ग्रन्थिरुमेशतुल्याद्
विद्याखनेः शास्त्रगुरोः सकाशात्।।४९।।

काशीनिवासेन किमर्थमेषा
ञ्चञ्चासदृक्कायभृतां जनानाम् ।
सौधाम्भसाप्याप्लुतशैलखण्डो
विष्णूयते किं कलयान्वकीर्णः ।।५०।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्वेश्वरायात्तशरीरभागा
मातान्नपूर्णानुग्रहीतुमार्तान् ।
भक्तान् तदीयं च दशाविशेष
मावेद्य त्रातुं समकेतयत्तम् ।।५१।।

व्याजादधसन् तामतरत्प्रतीपं
निःस्वां स्वकां नग्नदशामुदञ्चन्।
स्वोन्मत्ततां वा विषमाक्षिमत्तां
दीनाननुद्धर्तुसहां दिदेश ।।५२।।

प्रिये ! प्रियोऽसौ तव पञ्चवक्त्रो
द्वावौरसौ षण्मुखहस्तितुण्डौ।
कङ्कालशेषः परिचारकोऽन्यो
नन्दीवृषो वृद्धतनुस्तथैकः ।।५३।।

प्रेता गणा भैरवकोटपालः
क्षेत्रं च काशी कटुकण्टकोप्ता।
भूतिश्च भूषा शिरसीन्दुलेखा
शून्यामृता धूर्जटिता बिभत्सा ।।५४।।

कपालमालैककपालहस्ता
सौन्दयसम्पत् शिशुभीतिदात्री।
दृष्ट्वाप्यवस्थां वदसीश्वरं मां
दरिद्रनारायणसंज्ञकः ।।५५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नार्द्धाङ्गिनी चेद् भवती तदाहं
सांसारिकीं वृत्तिमवेक्ष्य नूनं।
पीतोग्रहालाहलदीर्घनिद्रो
लोकं ह्यवात्सं यमराजवासम् ।।५६।।

तस्माद् विजानीहि तवात्र दासो
विद्वान् समृद्धो मनुरेव भूयात्।
संवाधनिर्मुक्तधनादिधान्य
पूर्णः पृथिव्यां परिमोदतां द्राक् ।।५७।।

श्रुत्वाञ्चलेनाननपाटलाब्ज-
-मीषत्पिधाना स्मितिमादधाना।
विश्वेश्वरं नेत्रकटाक्षपातै-
-रावर्जयन्ती मधुरं बभाषे।।५८।।

धुन्वे यथाङ्गं खलविद्रुतानां
संद्रावयन्ती रिपुमस्तशूलैः।
रोगं भयं बह्निजलोग्रवातो
च्चण्डास्त्रजं मच्छरणागतानाम्।।५९।।

कीर्तिः कला शास्त्रसमग्रवित्तिः
काव्येषुशक्ति र्भवभुक्तिमुक्ती।
मन्त्रं नर्वाणं जपतां हृदन्तः
सर्वाः समीयुः स्वयमेव सोत्कम् ।।६०।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेजोहविर्भुग्यजमानहोत्रा
काशाम्बुभूमीपवनाष्टमूर्ति ।
विश्वं बिभर्सि प्रगुणानुकम्पात्
कस्त्वत्समो दीनदयालुरत्र ।।६१।।

पैपीलिको वेत्ति पशुर्न वा त्वा
मुद्भिञ्जसस्वेदजकीटकादिः ।
तेभ्योऽपि काचिन्नहि मूर्तिरिकाऽ-
-प्रपन्नकेभ्यश्चकृषे शरण्या।।६२।।

तत्तत्फलायाहितपूर्णभावः
सम्प्राप्य देवान् यजतेऽनुशिष्टः ।
प्राप्तान्यलिप्स्यैर्मुनियोगिभक्तै-
-रुपास्यसेऽहर्निशमीश ! वन्द्य ।।६३।।

भूतीच्छुको भूतिविभूषणं वा
सन्यस्तभूतिर्गजकृत्तिमन्तम् ।
नागादिको नग्नमनन्तवीर्यं
वीर्याय वीरस्त्रिपुरान्तकं त्वाम्।।६४।।

युञ्जानयोगोऽपि दृढासनस्थं
युक्तोऽप्यभिन्नात्मतया प्रसिद्धम् ।
सौन्दर्यकाङ्क्षः शशिशेखर! त्वां
मुग्धाङ्गसौन्दर्यमनन्तकामम् ।।६५।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोगाकुलो भोगपिनद्धगात्रं
धत्तूरपानं गुरुपानमत्तः ।
पिनाकहस्तं च युयुत्सुलोको
नाट्यप्रसूं नाट्यबुधो नटन्तम् ।।६६।।

विश्वात्ममूर्ते ! विहितानुबन्ध-
-लभ्यं यदस्तीह शुभं हि सर्वम् ।
लोकेषु लोकस्तदवाप्तिकाम
स्त्वामानमत्येकमभेदतत्त्वम् ।।६७।।

त्यक्तेर्ष्यमाप्राप्तपरम्परार्द्ध-
-सूक्ष्मेक्षिका ज्ञानकलार्जवानम् ।
देशं शिवेशं भजताञ्जनाना-
-माटीकते सर्वविधो विकासः ।।६८।।

वैदेशिको योऽस्ति निवेशशून्यः ।
सोचेऽहमासं वसनाद्विहीनः ।।
आसीत्तदाचारकलाकुलानां ।
पूर्णो विकासो भुवि भारतानाम् ।।६९।।

सर्वाङ्गविश्वं सविकास-मास्तां
भूमावसङ्कीर्णकलाविभेदम् ।
त्यक्तेर्ष्यसङ्घर्षनिजक्रियादिकं
वर्णोद्भवं तत् पुनरेतु काशम् ।।७०।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वैश्वर्याः शिवस्य प्रकटकलिभिदोऽन्योन्यमुत्कर्षवाचः
कार्मण्यं सर्वलोकेष्वगणितकलिलद्वेषमोहापहारम् ।
सम्पत्तेर्मूलभूतासमविषमकलाधानमुख्यः प्रयत्नः
सर्वेषां मङ्गलाय प्रथितगुरुकलाः सर्वदा सम्भवेयुः ।।७१।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# द्वितीयं-पुष्पम्

ततः समाधाय शरीर-वाङ्-मनः-
समेष्टिपुण्याङ्ग-समस्तकर्मणः ।
क्रियासुवा मूर्तमनोभिलाषया
शिवस्य धामाप सह स्त्रिया द्विजः ।।१।।

भगीरथानन्ततपः-फलामल-
-स्रवत्सुधोदङ्-मुखधारयाऽनया ।
सुरासुरैर्वन्दितवारिधारया
समावृताऽनन्दवनी द्युगङ्गया ।।२।।

स्वपूर्वजानुद्धर्तुं कृतं तपः
महद्भिरादित्यकुलोद्भवैर्नृपैः ।
तपःफलं द्योसरितं समासदत्
भगीरथो, वंशकृति र्हि सिद्धिसूः ।।३।।

कमण्डलोस्तुष्टविधेर्विनिर्गतां
कपर्दकुञ्जे समुवाह लोभतः ।
शिवः शुभां यां, परिहातुमीहतां
दिवोमणीं हस्तगतां बुधोऽस्ति कः ।।४।।

प्रजाशुतोषैस्तपसाऽप्ततोषणैः,
पितुर्ऋणं मोचयितुं तपस्यतः ।
नृपस्य कार्याय सुधोदविन्दवः
कपर्दतस्तत्यजिरे त्रिमार्गतः ।।५।।

कृतासनाङ्कस्य सितस्य वासुकेः
किमङ्गयष्टिं समुदक्षिपद् हरः ।
ससम्भ्रमं स्वर्वसुधातलातले
निवासिनः संदिहतेस्म दर्शिनः ।।६।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तपोऽर्जनप्राप्तशरीरतानवं
नृपेण सद्यो दुधुवे विलोकनात्।
क्रियावतो ग्लानवपुर्मनीषिणः
फलोपधानान्नवतामुपैति हि।।७।।

उवाच गङ्गा वसुधाङ्गता नृपं
सुताङ्ग! मां ब्रूहि समीप्सितं स्वकम्।
मम प्रसादात् समवाप्तदर्शनै
र्न वस्तु किञ्चिल् लसितं सुदुर्लभम्।।८।।

ऋणानि मातुश्च पितुस्तथा गुरो
-रमन्यत त्रीणि भगीरथो बुधः।
भुवं जलैस्तर्पयितुं च मातरं
पितॄन् गतासून् कपिलाप्तभस्मनः।।९।।

ऋणं गुरोरर्पयितुं समब्रवीन्
न व्योमकेशं रहय त्वमम्बिके!।
गुरोः कपर्दानजिहानया त्वया
मया सहैता कपिलाश्रमोऽगमः।।१०।।

भुवं सुधाभिः सलिलैः पितृँस्तथा
गुरोः कपर्दं स्निह्यत्सुधाजलैः।
सतर्पयन्नेकपदं भगीरथो
ऋणेभ्य आत्मानमलं मुमोचिवान्।।११।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा श्रुतिर्वेदविदः, स्तुतिः सुरान्
परप्रभा युक्तपथानुयायिनः ।
सिता च कीर्तिर्नयवेदिनो नृपान्
तथा सरन्ती शुशुभे भगीरथान् ।।१२।।

मदीयप्रेम्णा परिहाय पर्वतं
हिमालयं मत्पथकाशिकामितः ।
शिवोऽतिसिस्निक्षुरितीव मोदिता
सुरापगोदङ्गतिमेत्य पुप्लुवे ।।१३।।

रुषाभिधूता शिवया क़दाचन
वयस्यया काशिकया समध्रिये ।
इतीव हित्वोढगतिं, उदङ्मुखी
ससार सम्भावयितुं सुरापगा ।।१४।।

शिवाबिभीषोः शशिनः कलाधृतो
हृतार्धमावर्जयतो निजाननम् ।
स्रोतोधराचुम्बि जहर्ष ज्वालया
तृतीयनेत्रं मणिकर्णिकानलः ।।१५।।

अपासि पापं विहितानुष्ठितात्
समुद्गतं जीवविहिंसनादिभिः ।
सुराऽन्यस्वर्णेप्सुगुरूपतल्पग-
-श्रुतघ्नगोघ्नत्वमहाघराजिभिः ।।१६।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदा जनाः स्वापसुखानुभूति-
मवाप्नुवन्तो दुरितेषु शेरते ।
त्रिवादन-ब्राह्म-मुहूर्ततो बुधान्
विगाहितुं जागरिताः प्रघट्टकाः ।।१७।।

असी, च केदारदशाश्वमेधसद्-
-यशःप्रदः, पञ्चकगङ्ग्याभिधः ।
चतुष्पुमर्थाय चतुर्भुजायिताः
सुरापगायाः रुचिराः प्रघट्टकाः ।।१८।।

जना, विधानव्रतिनः, समर्चका,
हरार्पितान्तःकरणाश्च योगिनः ।
सन्यासिनो दण्डकमण्डलूधरा
नारायणास्त्यक्तगृहाः समासते ।।१९।।

भवाग्निदाहज्वलिताङ्गकर्शिता
मनःसिनाना धन-वल्लभा-दिषु ।
जनाः, सनोदात्तपथेन तारिता
येन, स्मरेत्तं करपात्रिणं गुरुम् ।।२०।।

शुकः कथायामधिसाङ्ख्यदर्शनं
मुनिर्हि भगवान् कपिलो वशेन्द्रियः ।
पतञ्जलिर्व्याकृतिशास्त्रगाहने
श्रुते रहस्याय स शङ्करो मतः ।।२१।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वपुस्तदीयं सकलैरधीक्षितं
जगत्पुनानं ज्वलदग्निसन्निभम् ।
आकर्षि केदारप्रघट्टसन्निधौ
तपस्वि, केदारपतेः समप्रभम् ।।२२।।

तमो लुनानाः शृणती दुरत्ययं
निष्कृष्य तत्त्वं श्रुतिशास्त्रतश्चिताः ।
कृतीः प्रजानामपि शासितुर्विदे
व्यधात्सदर्था जनजागराय ।।२३।।

साक्षात्शरीराः स्ववीसिनो महा-
-मनोमहात्मान इवासते ध्रुवम् ।
सुधाच्छघट्टेषु विनिर्मिताश्रमा
बुधाः समृद्धा यतयो विदर्थिनः ।।२४।।

यदा जनानां महती बिभीषिका
निजार्यधर्मेषु शुभार्यवर्तिनाम् ।
स्वभाषया निर्मितमानसार्यया
ररक्ष धर्मं तुलसीप्रघट्टकः ।।२५।।

श्रितं न यैर्मानसमार्यसच्छदै-
-गभीरसर्वार्थपयःसमेधितम् ।
प्रचण्डतापाकुलचेतसां कुत
स्तेषां भवेच्छान्तिसुखानुभूतिः ।।२६।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परार्थसेवैकसमर्पितात्मनः
पराक्रमेणोर्जितवीर्यसम्पदः ।
चतुर्दिशासून्मुखितामवापिता
मरुत्सुतस्य प्रतिमाश्चकासते ।।२७।।

स मारुतिः कस्य न वन्दितोऽर्चया
दिशं यमीं पुप्लुषुरिद्धसाहसः।
विहायसोच्चैः परिचर्यया तयोः
सरामयोः कीर्तिविशेषभाजनम् ।।२८।।

रुजाज्ञतानिर्धनतानिपीडितै
रुपासितो दक्षिणदिङ्मुखः कपिः।
अरोग वैदुष्यसमृद्धिभिस्त्वरं
दधाति तन्त्राश्रितमूर्तिरुत्तमः ।।२९।।

महामनोभिः परिपक्वलक्ष्यया
धियोपगङ्गं मदनोपमोहनैः।
सरस्वतीं वासयितुं न्यधायि हिन्-
-दुविश्वविद्यालयवाक्पतिः शिवः ।।३०।।

प्रतीच्यप्राच्योभयविद्ययाहिता-
-खिल-प्रतिष्ठास्पदसंस्तवश्रिरम् ।
समेषु विद्याभवनेषु गौरवं
निवेशयन् शीर्षमणिर्यथैधते ।।३१।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुत्यङ्गवैदुष्यपरम्पराधुरा
नवीनसर्वौषधियन्त्रचक्रया ।
चलन्नपश्यन्नतुलः, स्ववर्णने
महाकविं मूकमपीच्यदर्शनः ।।३२।।

सहस्रकं पञ्चदशैकडं त्वचन्
दधद्विभागाञ्च शतं चतुर्दश ।
सहस्रशः पञ्चदशैरधीतिनो
शतावृतिं षोडशकाद् गुरुणाम्।।३३।।

बृहत्सहायो हरिगौतमोऽभवत्
कुलेपतिः शासनशास्त्रसङ्गमः ।
अबाधमाच्छिन्नमनिन्द्यकर्मणा
अयन्त्रयत् सत्रमनल्प लाभदम्।।३४।।

गलद्विभेदं परिशासनोद्यमो
विधानतः शुल्कमदातुमुद्यमान्।
दयाश्रुभिश्चक्षुरमण्डयन्निजं
न दत्तविद्युद्व्यजनैः श्रुतार्थिनः ।।३५।।

प्रशास्ति सिह्माद्रिमहोदयोऽधुना
विभीषयन् कार्यकरच्युतात्मनः ।
नियोजयन् योग्यतमान् यथापदं
विवर्धतां कीर्तिभिरेधतां मुदा ।।३६।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरद्रुमो, भारतवासिनां गवी
दिवोऽथ चिन्तामणिरात्मदर्शिनाम्।
स्वनामधन्यश्च प्रणम्यते सदा
न विश्वविद्यालय एष कैर्जनैः ।।३७।।

बृहस्पतिर्देवपतेः सुधर्मया
कविर्बलेर्बाणमणेः समज्यया।
सभाजितः, सर्वधुरं वहन् श्रुतः
स कृष्णमूर्तिः सचिवोऽस्ति तादृशः ।।३८।।

न लेशतो गर्वकणश्च वाग्मिता
जनेषु कार्यार्यसमर्पितं मनः ।
देवव्रतं, देवगिरा प्रसादितं
स कृष्णमूर्तिर्नयवित् समेधताम् ।।३९।।

गुणान् न साक्षाद्वचसामधीश्वरी
कदाचिदाख्यातुमपीश्वरी भवेत् ।
महामनोभ्यो मदनेतिसंज्ञया
समालवीयेभ्य इयं शिरोनतिः ।।४०।।

स्वतन्त्रतायै नयकोविदाद् यतो
युयुत्सवः शौर्यनयानधीयते ।
महात्मगाधिप्रभृतिर्महायशा-
-महामनःपादयुगं हृदादधे ।।४१।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विभूतिभिर्दक्षिणदिग्भिरावृता
नवीनप्राच्योभय-विद्ययायुतैः ।
शिवप्रिया काशितरा प्रणम्यतां
सभुक्तिभिर्मुक्तिमभीप्सुभिः सदा ।।४२।।

काशीविद्यापीठनाम्ना स्वसख्या
संवीक्ष्यो यो विश्वनाथाधिवासः ।
वारुण्याशा संस्थितेनोन्मुखेन
वन्द्यो लोके सर्वभूतैर्मनोभिः ।।४३।।

नैवं ध्यानान्नैव दृग्भ्यां न पद्भ्या-
-मागत्याऽयं सेवितः स्नानदानैः ।
तैः किं कार्यं निःश्वसद्भस्त्रतुल्यै
र्मोघं लोके जन्म तेषां मतिर्मे ।।४४।।

इत्थं विश्वे संस्कृतस्याश्रयो यो
लोके ख्यातः, विश्वविद्यालयैकः ।
श्री सम्पूर्णानन्दनामा गरिष्ठै
र्विद्वदवर्यैः सेवितः ख्यातवृत्तः ।।४५।।

सर्वाङ्गानां प्राच्यविद्याधराणां
मुख्यं केन्द्रं देवभाषा-विदां यम् ।
देशस्त्वद्याप्याप्य विद्यावबोधा-
-याकाङ्क्षीत शासनस्योन्मुखत्वम् ।।४६।।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं नो यान्त्री नान्तरिक्षी न भौमी
पाताली वा साण्डपिण्डोद्भिदाभूः ।
विद्या सर्वा नोपलब्धाऽर्यभाषा
सम्यग्वाचाऽबद्धपूर्णाङ्गशास्त्रा ।।४७।।

यत्नः कार्यस्तामवाप्तुं तपोभि
राचार्याणां दर्शितैर्मार्गजातैः ।
नैवं वादः कल्पनीयः श्रमेभ्यो
विद्वद्भिर्भो भारतीयैरसत्यः ।।४८।।

नैवं कश्चिद् वर्णभाषाऽवबोधात्
तत्त्वं यायाद् भूतले सर्वसिद्धम् ।
तत्त्वं गूढं यत्तु ज्ञानात्म तस्यां
कार्यं तत्र स्वश्रमाणां फलित्वम् ।।४९।।

इत्थं लोकान् शिक्षयन्नुत्तराशां
व्यावृण्वानः, यां नौत्याशिवेष्टाम् ।
सेयं काशी सर्वविद्याप्रकाशी
नंनम्यन्तां तां भवन्तो भवन्तः ।।५०।।

विद्या सुनीतिविदुषां कृतिवीर्यभाजां
गेहे धनं मतिमतां विपदामभावः ।
राज्ञां गतिर्विनयतां निजदेशमेषा,
काशी समग्रफलमाश्रियतां सश्रद्धम् ।।५१।।

---

**टिप्पणी (गंङ्गास्तव)**

(५६)-१. चूडामणिपर्व नाम, सोमे सोमग्रहः रवौरविग्रह इति।

(५७)-२. मनु "ॐ नमः शिवायै नारायण्यै दशहरायै गङ्गायैस्वाहा" इति।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# शुद्धिपत्रम्

भूमिकायाम् निवेदनपद्ये च

रक्षंतां स्थाने ईक्षंतां

| पृष्ठसंख्या | श्लोकसंख्या | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | ८ | वयसा | वयसां |
| ३ | १२ | हार्या | हार्यम् |
| ७ | २८ | नावमम्यां | नावमन्यां |
| १० | ४० | भुवनमसृजते | भुवनमसृजदि |
| १२ | ४५ | विमलगतिरमून् | विमलमतिरमून् |
| ३८ | ४६ | हेयातां | हेयास्तां |
| ७४ | ५ | सुधोदविन्दवः | सुधोदबिन्दवः |
| ७९ | २७ | चकासते | चकासति |

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi